52 ਮਹਾਭਾਰਤ (ਖੰਡਿਤ)

॥ ॥ॐ नमो नारायणाय श्रीरामकृष्णोस्तु प्रसन्नः ॐ नमः सरस्वत्यै ॐ नमो गणेशाय नमः ॐ न
मः शिवाय स्वयंप्रकाशतीर्थोपिलब्धवेदांतिसत्पदः मंदादेवार्थमाचष्टे विष्णुनामसहस्रगं आचा॥
र्यैः यद्यपि व्याख्यातं नामसहस्रगं कापथवाक्स्वांतसंशुद्ध्यै पुनः कुर्वे तथाप्यहं मेरोश्च परमाणोश्च
पदार्थत्वं यथा समं आख्यातृत्वं तथास्माकं श्रीमदाचार्येषु च मयापि च भारतं श्रुत व्याख्याकाहं किंतु गु
रोः कृपा मूकं करोति वाचालं पंगुं लंघयते गिरिम् स्त्रीशूद्रा द्विजबंधूनां त्रयी न श्रुतिगोचरः इति भा
रतव्याख्यानं कृपया मुनिना कृतं इत्युक्ताः सर्वे सवर्णानां श्रोतव्योयं सत्त्वो भवेत् तदर्थश्च ततो व्या
ख्या मम सर्वोपकारिणी भाष्यबोधासमर्थानां जनानां हितकार्ययं नोपेक्ष्यः किंतु सत्कार्ये ग्रंथे
पि लघुना कृतः स्खलनेस्तु खलता कार्या न हानिः तावतास्ति मे कस्तूरीपामरैः त्यक्तास्वं महत्त्वं किंज
हाति अनेकविधधर्माणां श्रवणेपि न तृप्तिभाक् युधिष्ठिरः शांतनवं पप्रच्छ आमतुष्टये पंचभी
ष्मः परो भक्तः सूत्रमसुत्तरं ददौ तत्सर्वं सो निराचष्टे शौनकादीनृषीन्प्रति वैशंपायन इत्यादि अ
त्र वैशंपायनो जनमेजयं उवाचेति प्रकरणाल्लभ्यते जनमेजयस्यैव वैशंपायनं प्रतिप्रष्टृत्वावगमा
त् एतेनो वाचेति सामान्यशब्दस्य लक्षणया जनमेजयोद्देश्यकवाक्योच्चारणरूपविशेषपरत्वेन त
जनमेजयनित्यस्याध्याहारः स्थितस्यैव पदस्य वृत्त्यंतरमात्रकल्पने लाघवात् वृत्त्यंतरस्याप
दांतरस्य च कल्पने गौरवादिति केनचिदुक्तं परास्तं

प.भा.
दो.भा.शं.
२

...वनसामान्यशब्दस्यविशेषपरत्वमात्रेलक्षणा किंतुविशेषरूपेणबोधकत्वेपयाहुः शाक्यादन्येनरूपे
...त्तेभवतिलक्षणोनिशक्यातशाक्यतावच्छेदकंपरूषानशाक्यतावच्छेदकातिरिक्तरूपेणबोधेलक्षणे...
निःकर्षः नहिघटमानयेत्यत्रघटपदस्यपरत्वरूपेणैवपीतघटादिपरत्वेनलक्षणा किंतुपीतपरत्वादि...
पेणबोधकत्वेइत्यादिलक्षणमेवेत्यलमप्रस्तुतप्रसंगेनात्रसंपाशातनहृदामोहरयपनेपतनंपतने...तः ...
दुष्टमेजयति किंतंशब्दतोपस्मीतद्वैशंपायनःस्मृतइतिपौराणिकानिर्वचनवता वैशंपायन...
मुनेर्महाप्रभावत्वावगमात् जनंदुष्टमेजयतिकंपयतीतिव्युत्पत्त्यासजेदुष्टानिसूदकत्वादिमहा
प्रभा...स्यजन्मेजयेप्यवगमाच्चप्रष्टुंप्रत्युत्तरदातृत्वेयोग्यतास्त्वचाननतेस्तस्याःशब्दतो...काइतिः

वैशंपायनउ० श्रुत्वाधर्मानशेषेणपावनानिचसर्वशः युधिष्ठिरःशांतनवंपुनरेवाभ्यभाषत। ५१

आदिवृद्धिस्तुसार्वाधिकाणप्रत्ययोतत्वात श्रुत्वेति अशेषेणसामस्त्येनतुल्लंहितानसमस्तानिति पावनं
धर्मान्स्वर्गादिफलकानिकर्माणिपावनानिप्रायश्चित्तरूपाणिपापहपकराणिचसर्वशः सर्वप्रक...
श्रुत्वाप्यपरितृप्तःयुधिष्ठिरः युधिसंग्रामेस्थिरइतिव्युत्पत्त्यास्वकार्येस्थिरोनतुचंचलइत्यर्थः...
तेनतस्त्योत्तरप्रश्नमति...योग्यमितिसूच्यतेसंसारमनाम्नुसप्तम्याअलुकगविषुधिष्ठिर्यांस्थिरइतिषत्वं शांत
नवंशांतनोः पुत्रंभीष्ममनेनतच्चतत्त्वप्रसिद्धःपितृभक्त्यातिशयः सूच्यतेपुनरेवएवंश्रुतधर्मापि
येतया विशिष्टमेवपुनरप्रष्टमेभेदइत्यमरकोशभेदशब्दस्यविशेषपरपरत्वेवंव्याख्यातमभिवर्का।
त्वात्तल... अभिसंमुखंअनेनशिष्यरीतिः सूच्यतेअभाषतदृष्टवान् २

युधिष्ठिर उवाचेति पुनरुक्तिस्तु पुराणेतिहासशैलीमनुसृत्य उवाचेत्यस्यैव एष्टव्यानित्यर्थः । किमेकं
मित्यादि प्रश्नषट्प्रश्ना लोके लोकनहेतुभूते समस्तविद्यास्थाने मुख्यमेकं मुख्यान्यकेवला इत्य
मरः देवतमुपास्यं । किं मुख्यत्वं च सर्वाराध्यत्वं सुखाराध्यविशिष्टफलदातृत्वादिभिः । इतीवं प्रश्नमा
हा किं वेति वाशब्दः प्रश्नसमुच्चये परायणं इयते प्राप्यत इत्ययनं वाहुलकात्कर्मणि ल्युट् परमुत्कृष्टं
प्राप्यं एकं मुख्यं किं ऐहिकफलादि आमुष्मिकफलं वहूनि दत्वं वहुलकालस्थायित्वादिना परं ते...

युधिष्ठिर उ० । किमेकं दैवतं लोके किं वाप्येकं परायणं स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभं २

र मुख्ये तैः स्वप्रकाशानित्यानंदरूपत्वेन तृतीयचतुर्थप्रश्नावाह कस्तुवंत इति मानवा इत्याधि...युपल
क्षणं मनुष्याधिकारं हि शास्त्रमिति मानवा इत्युक्तं कस्य स्तुत्या हेतुभूतया अधिकारिणः शुभमैहिकमा
मुष्मिकं च प्राप्नुयुरेवं कस्यार्चनेन हेतुभूतेनेति प्रश्नः चतुर्थः स्तुवंतः अर्चंत इत्युभयत्रापि लक्षणहेत्वोः
क्रियाया इति सूत्रे हेतुत्वबोधकस्य तृप्रत्ययस्य दर्शनात २ २ २ २ २

शा.प्र.
२

पंचमप्रश्नमाह कोधर्मइतिस्पष्टोर्थः परमत्वंहिंसारहितत्वमुक्तंकिंचनसेव्यत्वादिनाषष्टंप्रश्नमाह किंजपन्निति किंजप
जयपरिपाटीमात्मनुसंधेयजपरूपप्रतिपाद्यताद्गुणस्वरूपतयानुसंधानः जंतुजीवोधिकारीजंतुशब्देन जीव
धिवत मात्रवाचिनानयत्तविधिनवतोवलवतोविघ्नवतएवाधिकारीतिनुप्रतादृशस्यापिजपेसइतिसूच्यते ग्रंथात्प्रि
तप्रत्यपोहेतोकिंसंवंधिगुणप्रतिपादकमंत्रानुसंधानरूपजपेनहेतुभूतेनजन्मसंसारवंधनाज्जन्मपदस्योरपु

कोधर्मः सर्वधर्माणांभवतः परमोमतः किंजपन्मुच्यतेजंतुर्जन्मसंसारवंधनात २

पलक्षकंयद्वासंसरतिपुनरुत्पद्यतेऽनेन जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यचेत्युक्तरीत्यासंसारोम
तुरस्मिन्पक्षेनवंधनपदस्यपौनरुक्त्याशंकापि जन्ममृत्युएवंवंधनमात्मनः सच्चिदानंदताविरोधित्वतो
मुच्यतेमुक्तिंप्राप्नोतीतिपावत जन्मपदस्यमृत्यु पलक्षकत्वेतुजन्ममृत्युरेवसंसारस्तस्यहेयत्वात्पृथंवंध
नरूपत्वमुक्तमितिबोध्यं ३३३३

शि द

न ५

भीष्म इति अत्र विदित्वा माहात्म्यं योगं च भीष्मस्य पुरुषर्षभः सहसोत्थाय संहृष्टो यानमेवान्वपद्यतेति राजधर्मोक्तेः श्रीकृ
ष्णाकर्षणक्षम[illegible]शालीभक्तियोगो भीष्मपदेन सूच्यते जगत्प्रभुमिति यद्यपि प्रश्नक्रमेणोत्तरमुचितं तथापि उपस्थितत्वा
त्षष्ठप्रश्नस्यैवादावुत्तरमुच्यते जगतां सर्वेषां प्रभुमीश्वरं देवानां लोकोत्तरशक्तीडाशालिनामिंद्रादीनामपि देवं पूज्यं
१४ यद्वा दिवुधातोः स्तुत्यर्थत्वद्दिवशब्दोत्पत्तेर्दिव्यं स्तुवंतीति देवास्तेषां देवं स्तोतारं वा इत्यतो हि सर्ववेदे तमानि नो मानयो[illegible]देवेति
राजधर्मोक्तेः ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं इति श्रीभगवद्गीतोक्तेश्चानंतं नाशरहितं पुरुषोत्तमं[illegible]यति
भक्तानां कामान्सीदति अव साधयति च भक्तविरोधिन इति पुरुषः स्मरणात्ता[illegible]दत्ताः इत्येव ततो, अक्षे पुरुषोत्तमः
तदृत्युद्योगपर्वणि संजयोक्तेः स चासावुत्तमश्चेति यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथि

भीष्म उ० जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमं स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ४

तः पुरुषोत्तम इति भगवद्गीतोक्तेः पुरुषोऽधिकारी सततो निरंतरं युक्तः सन्नामसहस्रेण स्तुवन्पुरुषोत्तमनीयन्नत्रु
णत्वात्कनामसहस्ररूपशब्दानुसंधानं कुर्वन्सर्वदुःखातिगो भवेदित्यन्वयः गुणत्वापकशब्दानुसंधानमात्ररूप एव
हि जपो न तु तादृशशब्दसंकीर्तनियर्यतस्तस्य चोपांसुमानसेति त्रैवि[illegible]संभवात् अत्र नामसहस्रेणेत्युक्तेः अनादि
निधननित्यत्रानुक्तश्चैतस्य षष्ठप्रश्नोत्तरता अनादिनिधनं इत्यस्य च तृतीयप्रश्नोत्तरता बोध्या अवश्यं हि कें जयान्तेरा श्री
स्योत्तरेण अत्र भाव्यं न चोत्तरे जपशब्दोक्ति अत उपस्थितिविशेषाच्चैतस्यैव षष्ठप्रश्नोत्तरतापुक्तेतरान चैवं पुराणमुक्तः कृ
सर्वोपि स्तवो जपः स्यादिति वाच्यं शास्त्रोक्तजपपरिपाटीशालिनः शब्दानुसंधानस्य जपत्वाददृशस्य स्तवरूप
त्वात् किं च शब्दप्रधानं जपोऽर्थप्रधानस्तव इति भेदाद्वानिकविन्नवप्पापासमाधारजस्रूपाः स्वमेधादि[illegible]र
लभ्यस्य मोक्षस्य कृष्णकेवलानुसंधानमात्ररूपेण नामसहस्रजपेन लाभ इत्याशंकायां जगत्प्रभुं

म.भा.
टी.ध.
३

द्रूदत्यादिना विषयविशेषउक्तो भगवद्रूपस्तत्र या च विषयमाहात्म्या दत्या॥ यास्तसाध्येनापि कर्मणा फलविशेषलो
भउचितिन एवेत्युक्तमतएव स्कांदे नारदंप्रति ब्रह्मवाक्यं लोकेनैकेन देवर्षे नामसहस्रकस्य पत्याठितेन फलंप्राके
नांस्त्रिनुशतैरपि नत्रैव श्रीकृष्णार्जुनसंवादे स्तवं नामसहस्रांख्यं ये न जानंति वै कलौ भ्रमंति ते नराः लोके सर्वधर्म
त वहिः कृता॥ कृत्वा नामसहस्रं तु नान्यो धर्मोस्ति केशवेनेः कलौ प्राप्ते गुडाकेश सत्यमेतन्मयोदितं पत्रे दत्ते
तपोभिश्चस्तवैः प्रीतिर्न मे मुने संतुष्टिस्तु न चान्येन विना नामसहस्रकं ॥ किंच यस्यैकैकनामव्याहारोपि सकृद
पियेन कृतेन चिद्याद्दृशेन ताद्दृशेन यस्यांकस्यांचिदवस्थायां पत्रकचित यथाकथंचित्कृतो नत्कृष्टं फलं ददाति कि
मुतनस्य नामसहस्रजप इति तथा च पुराणे च सकृदुच्चरितं येन हरिरित्यक्षरद्वयं वद्धपरिकरस्तेन मोक्षाय
गमनं प्रति श्वदः पुल्कसको वापि मुच्येरन्यस्य कीर्तनात् ब्राह्मणाः क्षत्रियाः वैश्याः स्त्रियः शूद्रांत्यजादयः य
त्रतत्रानुकुर्वतो विष्णोर्नामानुकीर्तनं सर्वपापविनिर्मुक्तास्तेपि यांति सनातनं ॥ अयं हि कृत्स्नो निर्वंशो जन्मको
त्या टीसहस्रमपि यद्यज्जह्यारविवशो नामसवस्त्य यनेहरे अप्रमेजामित्ततः स्तेनं सुरापो मित्रघ्नो ब्रह्महा गुरुतल्प
गः स्त्रीराजपितृगोहंता ये वा पातकिनोपरे सर्वेषामप्यघवतामिदमेव सुनिष्कृतं नामव्याहरणं विष्णोर्यत
स्तद्विषया मतिः विष्णुधर्मे चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत् नाशौचं कीर्तने तस्य स्यात्पवित्रक
रोयतः स्कांदे न देशकालावस्थात्मशुद्ध्यादिकमपेक्षते ॥ किंतु स्वतंत्रमेवैतन्नाम कामितकामदं नदे
नि शनियमस्तस्मिन्न कालनियमस्तथा नोच्छिष्टादौ निषेधश्च श्रीहरेर्नाम्नि लुब्धक विष्णुध
र्मोत्तरे नामानि सर्वाणि जनार्दनस्य कालश्च सर्वः पुरुषप्रवीरः तस्मादा सर्वग
तस्य नामग्राह्यं यथेष्टं वरदस्य राजन् ॥ ॥ स

तद्वा ॥ श्रीभागवते प्रथमस्कंधे तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकि
तानि यत् शृण्वंति गायंति गृणंति साधवः इति अन्यत्रापि नाममाहात्म्यप्रतिपादकानि वाक्यानि सहस्रशः संति तत्र
कानिचिल्लिख्यंते ब्रह्मपुराणे अनन्यचित्तः शुद्धो वा यः सदा कीर्तयेद्धरिं सोपि दोषक्षयान्मुक्तिं लभेच्चेदि
पतिर्यथा पद्मपुराणे संसारसर्पसंदष्टनष्टचेष्टैकभेषजं कृष्णेति वैष्णवं मंत्रं श्रुत्वा मुक्तो भवेन्नरः य
त्र कुत्र स्थितो वापि कृष्णेति परिकीर्तनात् सर्वपापविशुद्धात्मा स गच्छेत्परमां गतिं सर्वधर्मोज्झिता विष्णो
र्नाममात्रैकजल्पकाः सुखेन यां गतिं यांति न तां सर्वेपि धार्मिकाः विष्णुपुराणे विष्णुसंस्मरणादेव
समस्तक्लेशसंक्षयः भयं भयानामपहारिणि स्थिते मनस्यनंते मयि कुत्र तिष्ठति यस्मिन्स्मृते जन्मज
रोद्भवानि भयानि सर्वाण्यपहंति तात शिवपुराणेपि कृष्ण[illegible] नाम सदा गेयं रामनामेति च महादेव
महादेव महादेवेति यो भवदेत् एकेनैव भवेन्मुक्तिर्द्वाभ्यां शंभुरृणी भवेत् श्रीभागवते एतन्निर्विद्य
मानानामिच्छतामकुतोभयं योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनं कलेर्दोषनिधे राजन्नस्ति ह्येको
महान्गुणः कीर्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत् मात्स्ये परदाररतो वापि परापकृतिकारकः स
शुद्धो मुक्तिमाप्नोति कृष्णनामानुकीर्तनात् गारुडे यदीच्छसि परं ज्ञानं ज्ञानाच्च परमं पदं तदादरे
ण महता कुरु गोविंदकीर्तनं आदित्यपुराणे हरेः संकीर्तनं पुण्यं महामहापातकनाशनं सर्वकाम
प्रदं लोके ह्यपवर्गफलप्रदमित्यादि अलं बहुना प्रकृतश्लोकव्याख्यानमेवानुसरामः । ५ । ४ । ४ ॥

द्वा॰ध ४ [redacted] चतुर्थप्रश्न[redacted]स्योत्तरमाह तमेवेति तमेव पूर्वोक्तं पुरुषं पूर्णं भक्त्या सा परानुरक्तिरीश्वरे इत्युक्तल
क्षणया अर्चयेत् बाह्यार्चनेन पूजयन् ध्यायन् आभ्यंतरार्चनेन पूजयन् अवयवविनाशरहितमिति तत्पदार्थस्येव
१ विशेषणं अर्चनाक्रियायां वा अर्थस्यापगमो व्ययः इत्यमरोक्तेः अव्ययं व्ययरहितम् अपर्चयन् फलभागिति व्याख्येयं प
त्र लेनापि जगन्नाथः पूजितः क्लेशहा हरिः परितोषं व्रजत्याशु तृषार्त्तः सलिलैर्यथेति नारदीयोक्तेः स्तुवन्नम
व स्यन्निति पूजांगभूते स्तुतिर्नमस्कारौ कुर्वन्न[redacted]मेवेत्युक्ते अंगभूतावपि स्तुतिनमस्कारौ नान्यविषयाविति
कथयति स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवदित्यर्चनांग भ

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ५
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरं लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ६

ति तस्तुतिनमस्कारयोरेकदेश उक्तेः नित्यमिति क्रियाविशेषणमेव कृत्स्नं कमलपत्राक्षं नार्चयिष्यंति ये नराः जी
वन्मृतास्तु ते ज्ञेया न संभाष्याः कदाचनेति विसंभापर्वणि नारदोक्तेः ६ इत्थं यजमानः पूजकः सर्वदुःखातिगो भवे
दिति संबंधः पंचमीयप्रश्नोत्तरमाह अनादीति जन्ममरणाभ्यां षडपि भावविकारा उपलक्ष्यंते तथा जायते अ
स्ति वर्द्धते विपरिणमते अपक्षीयते विनश्यतीति षड्भावविकाररहितं विष्णुं व्यापनशीलं सर्वलोकानां म
हेश्वरं ब्रह्मादिभ्योप्यधिकं लोकं द्रष्टव्यवर्गं स्वस्वरूपबोधेनाध्यक्षयति प्रत्यक्षीकरोतीति लोकाध्यक्षः तं स्तुवन्नि
त्यं निरंतरं सर्वदुःखान्य[redacted]ध्यात्मिकादीनि अतीत्य गच्छतीति सर्वदुःखातिगो भवेदिति जपा[redacted]निस्त[redacted]वानां सा
गां॰ पे

स्तुत्यं विशिनष्टि ब्रह्मण्यं वेदाय तपसे चतुर्मुखाय च हितं ब्रह्मण्यं सर्वेषां साधारणं धर्मं सर्वान्धर्मान्वा जानाती
ति सर्वधर्मज्ञस्तं लोकानां महाजनानां प्रह्लादादीनां कीर्तिं वर्धयतीति वर्धनस्तं लोकैर्नाथ्यते याच्यते लोकना कीर्ति
थस्तं महत् व्यापकं भूतं परमार्थसत्यं सर्वेषां भूतानां भवस्य संसारस्य उद्भवं हेतुभूतं ७ पंचमप्रश्नस्यो
त्तरमाह एष म इति स्तवैर्गुणसंकीर्त्तनलक्षणैरर्चेत् एष धर्मः सर्वधर्माणामधिकतमो धर्म इति संबंधः जप्येनैव तु सं मे
सिद्ध्येद्ब्राह्मणो नात्र संशयः कुर्यादन्यत्र वा कुर्यान्मैत्रो ब्राह्मण उच्यत इति मनुवचनं जपस्तु सर्वधर्मेभ्योऽधिको ध
र्म उच्यते अहिंसया च भूतानां जपयज्ञः प्रवर्तत इति व्यासवचनं च पुरुषांतरद्रव्यदेशकालनियमानपेक्ष

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्त्तिवर्धनं लोकनाथं महद्भूतं सर्वभूतभवोद्भवं ७
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा ८
परमं यो महत्तेजः परमं यो महत्तपः परमं यो महद्ब्रह्म परमं यः परायणं ९ पवि
त्राणां पवित्रं यो मंगलानां च मंगलं दैवतं देवतानां च भूतानां योऽव्ययः पिता १०

त्वेनाधिककारणं ८ द्वितीयप्रश्नस्योत्तरमाह यः परमं तेजः यः परमं तप इत्यादि तस्य विष्णोर्नाम सहस्रं
मे शृणु इति संबंधः परमं प्रकृष्टं महत् बृहत् तेजः स्वेतरसकलप्रकाशकत्वेन सर्वावभासकं तप इति [illegible]शितमित्यर्थः तप ऐ २
श्वर्ये इति धात्वनुसारात् अनवच्छिन्नैश्वर्यम् इत्यर्थः परमं सत्यादिलक्षणं महत् महनीयं ब्रह्मेति परमं प्रकृष्टं
परायणं पुनरावृत्तिशंकारहितं एतदनुवादवत्त्वेनैव किं वाप्येकं परायणमिति द्वितीयप्रश्नस्योत्तरमु
स्यो क्तं भवति ९ प्रथमप्रश्नोत्तरमाह पवित्राणामिति अत्राप्यनुवादवत्त्वेन किमेकं दैवतमिति प्रश्न
स्योत्तरमुक्तं भूतानामव्ययो विनाशरहितः पितेति प्रसिद्धपितृवत्त्वेनेयमुक्तं १०

दा॰ धे॰ यतः सर्वाणि भूतानि भवंति यस्मिंश्च प्रलयं यांतीति जन्मंप्रलययोक्तत्वात्तन्मध्येस्थितिरप्युपलक्ष्यते व्रह्मलक्षणं
यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्यादिश्रुत्यनुसारात् ११ ब्रेमतः पापभया
पहमिति उक्तोयं चस्मादेकुर्वन्पापसहस्राणि भुंजानोपि यतस्ततः पठन्नामसहस्रं तु दुर्गतिं न स पश्यति उ
त्थायकालेपो नित्यं श्रुचिस्तद्गतमानसः नाम्नां सहस्रं चाधीते मुक्तिस्तस्य करे स्थितेति नच नामसहस्रमि
तिकथं विश्वादिनाम्नामावृत्तत्वात् संख्यायाश्च ष्टपक्षानि विषत्वादितिचेत् अर्थभेदा[illegible]द्भेदद्दुत्याश्च
य[illegible]त्नेन दोषाभावात् दर्शयिष्यते चार्थभेदस्तत्र तत्र १२ नामसहस्रमित्युक्तनाम्नां विशेषमाह यानीति

यतः सर्वाणि भूतानि भवंत्यादियुगागमे यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये ११
यस्य लोकप्रधानस्य जगन्नाथस्य भूपते विष्णोर्नामसहस्रं मे श्रृणु पापभयापहं १२
यानि नामानि गौणानि विख्यातानि महात्मनः ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये १३

गुणाश्रवेदो जन्मकर्मणोरप्युपलक्षणाः तेषां च गुणजन्मकर्मनि[illegible]मितानीति लभ्यते किं च गौणानि निगणपा
निगोणपावृत्पाप्रमुक्ता निवरत्तद्वस्फुटीभविष्यति तत्र तत्र नाहशान्यपि सहस्राधिकानीत्यत आह वि
ख्यातानि विशेषेण प्रसिद्धानि तादृशान्यपि सहस्राधिकानीत्यत आह ऋषिभिर्मंत्रैः मंत्रदृ
ग्भिः परिगीतानि [illegible] निभूतये पुरुषार्थचतुष्टयलाभाय १३ १ १३

अथ भाष्यानुसारेण नामार्थः स्पष्टमुच्यते प्रकृतिप्रत्ययायुक्त्या नाम्नां रूपं विविच्यते विशतिस्वकारणमिति वि
श्वं तस्य च कारणाभिन्नत्वात्कारणमपि विश्वशब्देनोच्यते पञ्चम्यस्य कर्तृत्ववाचित्वे सर्वनामकार्यापत्तिश्च
तुर्थ्यन्तादौ नयापिपानि नामानि तु नयानामत्वान्न दोषः अत एव विश्वेश्वराय विश्वायगोविंदाय नमः इति गो
पालतापिन्यां यदिदं तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुत्यनुसारेण विशति स्वकार्यं कारणत्वेनानुगच्छ
ति व्याख्यायते तदा न सर्वनामत्वं शंकापि यथासंभवं विशन्ति । श्रुत्यनुसारात् विशति य[illegible]स्मिन् वा [illegible] स
हारकाले इति विश्वमिति व्याख्यानेन कर्मादौ वा प्रत्ययः । क्लिष्टे बाहुलकात्वं लभ्येत स चान्यत्रातिके
श्रुतिपुराणादौ ता दृग्विवचने चासत्ति युक्त इति सुधीभिराकलनीयं विश्वप्रवेशानेद इत्यस्मात् अशूप्रुषि
लटिकणिखटिविशिभ्यः क्वन्निति कर्तरि क्वन् कार्यपरत्वेन पुंसकत्वं संज्ञानमेव कारणपरत्वे तु कि

ओं विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः २४

मेकं दैवतमित्यभिहितं दैवतं विशेषयमाद्यसंगमनायं सर्वाणि च नामानि यो गणसंनिगुण वृत्तानि [illegible]
मानि गौणानि तु युक्तेरेवमग्रे पि नाम्नां स्त्रीलिंगत्वे दैवता विशेष्या दैवतमित्यादि प्रश्नेन दैवतायामप्युक्तप्र
पत्वात् दैवतशब्दस्य स्वा[illegible]र्थिकतलप्रत्ययां स्वा[illegible]र्थिकाप्रत्ययेन स्वार्थिकं साधितत्वात् पुंलिंगत्वे विष्णो
र्नाम सहस्रं मे इत्युक्तान्विष्णुर्विशेष्यः नपुंसकत्वे तु दैवतमेव किमेकमित्यादि नो क्तं यत्तत्विश्वशब्देन व्याख्या
तं किं तदित्यपेक्षायामाह विष्णुरिती तिभाष्ये अयमभिप्रायः तमु स्तोतारः पूर्व्यं यथाविद ऋतस्य गर्भं जनुषा
पिपर्तन आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे इत्येवाविष्णुपदवत्या विष्णोर्नामकी
र्तनं सम्यग्ज्ञानप्राप्त्यर्थं निहितमतः किमेकं दैवतमित्यत्राविनु विष्णुरेवोक्त इति ऋगर्थस्तु तं स्तुत्यं च ज
गत्कारणं हे जनाः स्तोतारः स्तुत्यो दुर्पयेनलुटं सर्वमानं त्वं नियस्त्वमतिपरिणामात्वधीत्यर्थः किंभू

तः सर्वानिर्दृतत्वात्त्रैतं तु ज्ञं तदशंकार्थाः यथाविदं गुण

धं

तज्जगत्कारणं ॥ तस्य गर्भः वेदांतप्रतिपाद्यवस्तुनः फलमाह न तु पापि पर्ततेति जन्मप्रभृतिजन्मसंमान्या फलमिति भावः स्तु
त्यसंभवे जातः सर्वमस्य परमात्मनो नाम वित्तामापि विवक्षेन वदत सर्वं परानुयदिश्य पश्यतः स्वयमृत्युः एते भूततमा व
चायं ततेभ्यः प्रकाशात्मकं श्रामंतिश्रा हि स्तानात्मकं स्वरूपं हे विसोभा नाम हे से वा म हे इति वेवेष्टि व्याप्नोतीति विष्णुः
विष्णुर्व्याप्तौ जुहोत्यादिः दामाभ्यां नुरिति प्रधिकारे विचा क्विचेति नु प्रत्ययः यस्माद्विश्वमिदं सर्वं जातं तस्य महा
त्मनः तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनादिति विष्णुपुराणे ॥ विवेचने तु बाहुलकान्नु बोध्यः वषट्कारस्य व
वषट् क्रियतेस्मिन्निति वषट्कारो यज्ञः यज्ञो वै विष्णुरिति श्रुतेः ॥ स्वाहा देवहविर्दाने श्रौषट् वौषट् व
षट् स्वधेत्युक्तेः वषट् हविर्दानं करोतीति वा तेषां कर्मलक्षणं जुहुनं वा वितानेष्वाप्यजनं पंचाभिमिदं विष्णुर्नेः
तानां जातानां भव्यानां जनिष्यमाणानां भवजातानां प्रमाणानां वा प्रभुरीश्वरः भूतभव्यभवः कालत्रयैश्वर्यवान्
इत्यर्थः भूसत्तायामित्यस्मात् तत्रात्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेति सूत्रेण ●पः क्तः सकर्तरि
भावकर्मणोश्चेत्यर्थकेन भूते कर्तरि क्त उक्तः किती तीरक्तिषेधः भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वि
ति सूत्रेण भव्यादयः कृत्यप्रत्ययांता कर्तरि निपात्यंते कर्तरीत्यधिकारात् कृत्यानां च भविष्यदर्थकस्वभावता द्भव्यशब्दे
न जनिष्यमाणलाभः भवदिति वर्तमाने लट् उदेशाशतृ प्रत्यपातं प्रभुरित्यत्र विप्रसंभ्यो ड्वसंज्ञायामिति [illegible] दुः
कृयोग षष्ठीसमासः न लोकाव्ययेत तृउप्रत्ययग्रहणेपि सानुबंधकस्यात्रो स्यग्रहणमिति षष्टीनिषेधो न रा[illegible]
भ्राश्रित्य विरंचिरूपेण भूतानि करोतीति तमोगुणमधिष्ठाय रुद्रात्मना कृंततीति वा भूतकृत् दु कृञ् करणे इत्य[illegible]
कृती छेदने इत्यस्माद्वा क्विप् चेति सूत्रेण क्विप् ग्राघे ह्रस्वस्य पितीति तु कम्रतां न्याय्यमेव हन्तोति नयाम [illegible] यस्ती
दो पिशाचादेन्यायेस सत्योपमानुपोरिति विश्वः पोदेन कामान्नेभपान्नक्रोधान्नार्थः कारणात न्यायं संमनुव
तेति स्थिरबुद्धिरलोलुप इत्यु घोगपवर्ग ञ्जपरमात्मा परवचनादि तु भक्तोः ऽऽऽऽऽ

सत्वगुणमधिष्ठाय भूतानि विभर्त्ति धारयति पोषयति वा भूतभृत् भृञ् धारणापोषणयोः क्विप् भवसत्तात्मकः भू
धा धातो भुवि राजन् भूतानामात्मा अन्तर्यामी भूतात्मा एष त आत्मान्तर्याम्यमृत इति श्रुतेः यदाप्नोति यदादत्ते यच्चात्ति विषया
निह यच्चास्य संततो भावस्तस्मादात्मेति गीयत इत्यात्मशब्दनिर्वचनं अत्राचार्यचरणैः आत्मशब्दस्य पृषोदरादित्वं कल्पनी
यं चेत्तु पतिसातभ्यां मनिन् मनिण् तिमनिन् सातो तकर्मणि इति धातुस्तस्मात् मनिन् प्रत्यये आत्मेति रूपं भूतेषु भक्ते
ष्वात्मा वित्तमस्य भूतात्मा भीष्मादिभिरुक्तान् पक्रम्य ततो मे तद्भूतमन इति महाभारतोक्तेः भूतानि भावयति उ[illegible]यति
जं भूतभावनः णिच्यन्ताद्भूधातोर्नन्द्यादित्वात् ल्युः भूतानां भावना कथामपमारस्थितः कथमाछेतः कथमालप्येत:
कथं चालभ्यंतः कथमस्मान् कंपेत कथमस्मान्पश्येत कथमाभाषेत तत्तथा वा स्वाकुमनिपत्यादि रूपाय चेसभूतभा
भि वनः तत्रानुकंपां प्रसमीक्षमाणो भुंजान एवात्मकृतं विपाकं हृद्वाग्वपुर्भिर्विदधन्नमस्ते जीवेत यो भक्तिपदे स दायभाग्
इति दशम श्रीकृष्णपरब्रह्मवचनादिति भक्ताः १४ एवं तेन जन्मभवने उक्तः पूतः शुद्ध आत्मा पूतात्मा केवलो निर्गुणश्चेति श्रु
तेः परमः कार्यकारणविलक्षण आसौ चात्मा च परमात्मा पूतात्मा केवलो हि निर्गुणश्चेति श्रुतेः परम नित्य शुद्ध बुद्ध मुक्त
स्वभाव इत्यर्थः मुक्तानां परमा प्रकृष्टा गतिः गन्तव्या देवता मुक्तानां पालनपरायणो वा नां परमा गतिः पुनरावृत्त्यसंभवान्
दतस्य मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते इति भगवद्वचनं मुक्तमोक्षणः प्रियतीति पालनपरायणः परा
दित्वाद्युदृत्वादिगुणेन परेणावाधात् मातिसर्वत्र सर्वाभिलक्षणीयत्वादिति मा अन्येष्वपि दृश्यते द्वविधौ अपि
शब्दस्य सर्वोपाधिव्यभिचारार्थत्वेन धात्वंतरादप्युपपदाभावेपि डः परमायस्याः परमेति बहुव्रीहिः गतिरित्यत्र कर्मणि
स्त्रियां क्तिन् अत्र चतुर्थ्यन्तानाम निर्देशमुक्तानां परमायै गतये इति भवति नूनं मुक्तानां परमा गतयः इति विधौ दिवि
क्तिन्नेदेन देवतानिर्देशानि गदेषु तथैव कथनस्यापि पावकं माव हेत्वादौ सिद्धो तिन् त्वात् अधियमानो व्ययोना

म·भा   दि   जौ

७ ण्णोस्याव्ययः विपर्वादिणगतो इत्यस्माद्भावे परविव्ययशब्दं निष्पत्तेर्नभोस्त्यर्थानां वाच्योत्तरपदलोपइति बहुव्रीहावु
दा०धा त्तरपदलोपः पुरुषु भूरिषु शरीरेषु सारतीति पुरूणि सर्वकर्मफलानि सुनोति ददातीति वा पुरूषाणि भुवनानि सं
तिसंहारसमयेनाशयतीति वा पुरुषः षड्भावविकारणगत्यवसादनेषु षण्दानेषोन्तकर्मणि एषामन्यतमाडुः
सर्वज्ञसत्वं वा हुलकात् पुरुषामादित्वा च नव द्वारंपुरंपुन्यमेते भावैः समन्वितं व्याप्यशेतेमहात्मा यत्नस्मात्पुरुष
त्रे उच्यतइतिमहाभारते सर्वकर्मफलदातृत्वं सर्वसंहारकत्वं च भगवति प्रसिद्धमेव पूर्वमेवाहमिहासमिति तत्पु
रुषस्य पुरुषात्वमिति श्रुत्यनुसारेत्वपृषोदरादित्वं बोध्यं पुरग्रअग्रगमने इत्यस्मात्पुरः कुषन्निःस्युणादिसत्रेण
कुशात्वेनस्य पुरुषशब्दस्यार्थः श्रुतावुक्त इति बोध्यं साक्षादव्यवधानेनसर्वस्य द्रष्टा साक्षात् द्रष्टरि संज्ञा

ॐ पूतात्मा परमात्मा च मुक्तानां परमा गतिः अव्ययः पुरुषः साक्षी क्षेत्रज्ञोक्षर एव च १५

यामितिमनुत्रेणइनो अव्ययानांन[illegible]मात्रेटिलोपः परमात्मसंज्ञायामेवसंज्ञायामित्यस्यत्वारासिकत्वं व्यवहारसाक्षिणितुभोएव
साक्षिशब्दप्रयोगः क्षेत्रंशरीरंजानातीति क्षेत्रज्ञः क्षेत्रज्ञंचापिमांविद्धि इच्छाद्वेषइत्याद्युक्तत्वादेतत्क्षेत्रंसमासेनसवि
कारमुदाहृतं एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विद इति च भगवदुक्तेः क्षीतेर्धात्वर्थनिवासगत्योः [illegible]रतो [illegible]उप
पदे आतोनुपसर्गेकइतिप्रत्ययेरूपसएवनक्षरतीत्यक्षरः एवकारात्क्षेत्रज्ञात्परयोरभेदः परमार्थः तत्वमस्या
दिश्रुतेः चकारात्व्यावहारिकोभेदः प्रसिद्धरममामात्वादितिभाष्येक्षरसंचलनेअकाजसमासः अश्नोतेर्वा
संस्कृतिमहाभाष्योक्तेरश्नुतेव्याप्नोतीत्यस्मादश्नोतेःसरइतिसरप्रत्ययेव्यापकइत्यर्थोवा १५

थ

क्षिव

ज्ञानेंद्रियाणि संयम्य सर्वाणि मनसा सह एकत्वभावना योगः क्षेत्रज्ञपरमात्मनोरित्युक्तो योगप्राप्यत्वात् योगः युज समाधौ छि
वनोरिति कुर्वंतत्तो योगं विदंति लभंत इति योगविदः तेषां नेता निर्वाहकः योगक्षेमवहनादिनेति योगविदां नेता
विद ज्ञाने इत्यस्मात् क्विप् प्रत्ययेन जयते अत्र च तु पर्यंतं योगः विदां नेत्र इति भवति प्रधानं प्रकृतिमाया पुरुषो
जीवस्तयोरीश्वरः प्रधानपुरुषेश्वरः प्रपूर्वात् डुधाञो धिकरणे करणे वा किकरणयोश्चेति ल्युट् पुरुषः साधितः ईश्वर ऐ
श्वर्ये स्य ईश भासपिसकशो चरवच इति नरसिंहयोरिव वपुर्नरसिंहवपुः इत्यादिः नरं जातिनरः नृनये अच् सिंहः सिंह
: सिंचेः संज्ञायां हमुमो कश्चेति सूत्रेण कप्रत्यय रूकारादेशनुमी उणादिषु अवपवार्थानुगमस्य प्रापशोभावाद वपवा
पीभावे पिनस्तीति रन्येतु सिंहवर्णविपर्यादित्यनुसारेणा हिनस्ति सिंहा रित्याहुः हिसि हिंसायां भवृदुप्यते कर्मणि च वपुः

योगो योगविदां नेता प्रधानपुरुषेश्वरः नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः १६

उप्तं बीजसंतानेन जनेहासिय मिकारः अर्तिगृवपि यजितनिधनि भ्यो नित् इति उसिः नरसिंहवपुरिति भक्ताः श्री रस्यास्तीति श्री
श्री मान् नित्ययोगे मतुप् श्री यते सर्वैः श्रीञ् क्विप् वचि प्रच्छ्यायतस्तु कटप्रुजुश्रीणां दीर्घो संप्रसारणं चेति क्विपि दीर्घः प्रशस्ताः केशा सं
त्यस्य केशवः केशाद्वोन्यतरस्यामिति वः क्लिश्यते केय जेस वैश्री शतं धेः क्लिशेः रन्लो लोपश्चोन्यत्र यस्मात्त्वये पदुष्टात्मा
हतः केशी तेना नंदनः तस्मात्केशवनाम्नात्वं लोके गेयो भविष्यसीति विष्णुपुराणानुसारेण तु ब्रह्मोदरादित्वं पुरुषोत्तमः यस्मा
त्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः भाष्ये तु पुरुषाणामुत्तम इत्युक्तं तदर्थिकाभिप्रा
ग्रहे येण न त्ववि समासः न निर्धारणे इति षष्ठीसमासप्रतिषेधात् न च सप्तमीरूपा विशेषादिति वाच्ये षष्ठीसमासे अंतोदात्त
त्वे सप्तमीसमासे तु पूर्वपदप्रकृतिस्वर मिति विशेषात् उत्तामप्यातीत्युत्तमः तमुग्लानौ १६

स॰भा॰ २ स्मिन्सर्वः प्रिवः भाष्यतु निस्त्रैगुण्यतयाशुद्धत्वात् शि॰ स्तुत्तेति तीति स्थाणुः स्थिरत्वात् दाभ्याप

टी॰ध॰ ८ ऽवयते कारणत्वेनानुपगम्यते सर्वः स्वगतो सर्वं निपषरिखलव्यासिचय इत्यप्रदेशाग्रतंत्रे इति अकर्तरि क्त प्रत्ययान्तो निपात्य
वा ते असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात् सर्वस्य सर्वदा ज्ञानात् सर्वमेनं प्रचक्षत इत्युद्योगपर्वणि पठ्यते इति सम्यगाप्नोति
सर्वमर्थमिति सर्व इति भट्टकैर्विगहीतां नत्रांत तत्र शंतिस्त्रे चैकदेशो विरोध अनन्वयात् तत्रैकिं सत्तोसामकइतिप्रत्युदाहृतं तत्रैवेत्तो स
र्वस माप्नोषित तो सिसर्व इति तुल्य न्यायादिना नेयं सर्वाप्येति चतुर्थ्यन्तम्याणाति सकलाः प्रजाः संहारे इति सर्वः शृ हिंसायां करण
श्च दम्भो वः शोतेः शुरित्य विकारेस्य इति सूत्रेण नुप्रत्ययेण त्वं वा बाहुलकात् स्थाणुः कीले हरे स्थिरे इति कोशः भूतानामादिः का
रणत्वात् भूतादिः आदीयते कार्योत्पत्तये आदिः आङ्पूर्वो डुदाञ् दाने इति धातुरुपसर्गयोः किः इति धीयतेस्याप्यते आद
रेण निधिः स एव निधिर्विशेष्य तस्य अव्यय इति प्रविनश्वरो निधिरित्यर्थः पत्तु भाष्ये प्रलयेस्मिन्सर्वं निधीयत इति निधिः कर्म यो:

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः २७

ण्यधिकरणे चेति किप्रत्यय इत्युक्तं तत्कर्मण्युपपदे घो किः स्यादधिकरणेर्थे जलानि धीयंतेऽस्मिन् जलधिरिति व्या
ख्याने न हतिकारादिकृतेन विरुद्धं कर्मण्यधिकरणे च प्रत्ययो भवतीति व्याख्याने सूत्रे वैयर्थ्यापत्तेरभावे अकर्तरि
चकारकेऽत्यधिकारात् बाहुलकात् कर्मोपपदाभावेपि तेन किप्रत्यय इति वा कथंचित्समाधेयं चतुर्थ्यन्तं तु निधये अव
यायेति बोध्यं नत्वव्ययाय निधय इति सत्य विशेषणविशेष्यभावेपाव क्रमावधिमानाभावात् नहि भिन्नपदमपि विशेषणं प्र
र्वनिपात्यमिति नियमः न्यग्रोधकृतेः ह्रदोरविरेवतेनभवशब्देन बहुव्रीहिः विशेषणविशेष्यभावे विनिगमनाविरहाच्च
एवमेवाग्नये पवमानायेत्यादिषु स्थितं सम्यक् भवो भवनमस्य पुंभवः धर्मसंस्थापयसजनवासिषु सर्वेषां मोक्षाणां फलानि भावं पति
इति भाव नः फलमतोरूपपत्तेरिति न्यायात् स्वयं च स्वाधिष्ठानत्वेन धारणेन ततः प्रभवत्यस्माज्जगत् प्रभवः आप्राप्ताने प्रपूर्वसुक्रियासुसा त्रिव

स्वयमेव भवतीति विद्यते स्वयंभूः ।। शंभुः शं सुखं भक्तानां भावयतीति शंभुः शंभुरिति मांतौ अव्यय उपपदे भूधातोरंतर्भावितरायर्थान्मितद्रु
दित्यउपसंख्यानमिति डुः दो[illegible]खंडि[illegible]तोदितिदो ग्रवखंडने क्षिप्तं क्तिन तदिदिरूपं ग्रदितिदेवमाता तस्या ग्रपत्यं वा ग्रनावै ग्रादि
त्यः दित्यदित्यादित्येतिएयः पुष्करे कमले वा हिलिणी यस्य पुष्कराक्षः विसप्रसूनराजीवपुष्कराम्भोरुहाणि चेतिकोशः पुष्करणीति
नलंप्रुषपुष्टो वाहुलकात्कारगणाभावः ग्रस्नुते व्याप्नोति विषयमहि चक्षुः प्राप्यकारित्वांगीकारात् बहुव्रीहौ सव
थ्यक्ष्णोरितिषच् महान् उत्कृष्ट स्वनो नमे भक्तः प्रणस्येतीत्यादि वेदरूपो वा यस्य महास्वनः ग्रस्य महतो भूतस्य

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः

निःश्वसितमेतदिति श्रुतेः बहुव्रीहिस्सन्महतः इत्यात्वं न च तत्र सन्महदिति प्रतिपदोक्तसमास एव इति वाच्यं महाबाहु
प्रनुरोधेन समानाधिकरणपदसामर्थ्याश्रवलक्षणप्रतिपदसामर्थ्याश्रवलक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तेस्तत्रा
नंगीकारात् प्रतिपदोक्तसमासग्रहणेन तस्य समानाधिकरणेतरपदत्वनियमेव समानाधिकरणपदसामर्थ्यादन्य
त्रापत्त्वमिति व्याख्यानात् स्मिः स्वीकारात् प्रत्तनाष्यो महान् र्जितः स्वनो नादः श्रुतिलक्षणो वा यस्य स महास्वन इत्युक्तत्वा
त्सन्महदिति समासे ग्रात्महतः इत्यात्वमित्युक्तः तत्कर्मधारयान्मतत्सर्वयाचतद्वतिलक्षणं वाप्वीकृत्यकथंचित्समेयं न

नै
१९
ना॰ जन्मा

टी॰ ध॰ नस्तस्य आदिनिधने जन्मविनाशौ वस्य अनादिनिधनः निरवयवात्वात् स्वापिरजिदंतिनिधानः क्वनितिकुनिनिधनशब्दो निध
नंस्यात्कुलेनाश इति विश्वः अनंतादिरूपेण विश्वं दधातीति धाता कर्मणां तत्फलानां तत्कर्ता विधाता विश्वस्य बीजः रूजस धा
मानार्थकत्वात् धातुर्विरिंचेः सकाशात् उत्तमः उत्कृष्टः धातुरुत्तमः चतुर्थ्यांतकरणे धातुरुत्तमायेतिः भवतिनतु धातुत
मायेति बोध्यं अथवा धातुशब्दस्यौकारांतत्वांगीकारेण एधिव्यादिधातुभ्यः उत्कृष्टश्चिद्धातुरित्यर्थः अत्रपक्षेचतु

अनादिनिधनोधाताविधाताधातुरुत्तमः १८

र्थ्यंतकरणेधातवेउत्तमायेतिभवतिनतुधातृत्तमायेतिधातुःउत्तमइतिद्वेनामनीवाकार्यकारणप्रपंचधारणात्परंतत्मेव मा
स्तु धातुरित्युच्यतेधाजःसितनिगममितसिसव्याविधाजकुशिभ्यस्तुत्रितितुन् अल्पुतइतिनामव्याख्यायनाम्नामांघ्रंश
शतंविवृतमिति वक्ष्यमाणभाष्यादेकनामत्वपक्षोभाष्यकृतोभिप्रेतःअन्यथासर्वादिरितिनामव्याख्यायनदुक्तेरौचि
त्यादि
त्यादितिभातिः१८ शि॰ २

शब्दादिहीनत्वान्न प्रत्यक्षगम्यः नाप्यनुमानगम्यः तद्व्याप्तलिंगाभावात् नाप्युपमानसिद्धो निर्भागत्वेन सादृश्याभावात् नाप्यर्था
पत्तिग्राह्यस्तं विनानुपपद्यमानस्याभावात् नाप्यनुपलब्धिगोचरो भावरूपत्वाभावादभावगोचरत्वाच्च षष्ठप्रमाणस्य
नापि शास्त्रप्रमाणैर्वेद्यः प्रमाणजन्यातिशयाभावात् यद्येवं शास्त्रयोनित्वं कथमुच्यते प्रमाणादिसाक्षित्वेन
प्रकाशरूपप्रमाणाविषयत्वेऽप्यध्यस्तातद्रूपनिवर्तकत्वेन शास्त्रप्रमाणकत्वं नित्यवममेय इति भाष्य न प्रमातुं
महाबाहुः शक्योयं मधुसूदनः परं हापरमेतस्माद्विश्वरूपान्नविद्यते इति हरिवंशे प्रकृष्टोत्मा इमानइत्यस्मा
त्कर्मणिशक्यार्थे अप्रत्ययः यत् नदयतानात्वं हृषीकाणामिंद्रियाणामीशः तेप्रत्ययरूपेण हृषीकेशः यद्वाद्दि
प्राणमीशो जीववदनीयः यस्यवासरूपस्य जगत्प्रीतिकरा हृष्टाः केशा रश्मयः सप्तेंदरादित्वात्सो

अप्रमेयो हृषीकेशः पद्मनाभोमरप्रभुः विश्वकर्मामनुस्त्वष्टास्थविष्टःस्थविरोध्रुवः २६

धुर्वंतयाचमोद्यतधर्मे सूर्याचंद्रमसोः शश्वदंशुभिः केशसंज्ञितैः बोधयन्स्वापयंश्चैव जगदुत्तिष्ठते पृथक्
बोधनात्स्वापनाच्चैव जगतो हर्षणं भवेत् अग्नीषोमकृतैरेवं कर्मभिः पांडुनंदन हृषीकेशोहमीशानो
वरदो लोकभावनः इति अग्नीषोमौ सूर्याचंद्रमसौ भक्तसंवर्धनेन हृष्यतीति हृषा औणादिकः काप्रत्ययः कामा
सुखो नामीशः केशाः हृषाः सौकेशाश्च हृषीकेशं हृषीत्सुखेषु पर्यात् हृषीकेशत्वमश्रुतेः इत्युद्योगपर्वसमानं जयो
क्तारितिनुभक्ताः जगत्कारणं पद्मं नाभावस्य पद्मनाभः अजस्य नाभावध्येकमर्पितं येषु स्मिन् विश्वानि भुवनानि जस्युरि
ति रिष्कृतेः पद्मं नाभौ यस्मात् मत्वर्थीयप्रत्यये पद्मनाभत इति नाभिः नहृबंधने नहोभश्चेतनाभिः स्यात्स्त्रियां पुंसि प्राण्यंगे तु नाभिः प्रिया
मता प्राण्यंगेपुंस्यपीति केचित भगवद्रूद्देवपर्वगोलोयं सप्तमाविशेषणे चवाहुविनिस्तापकाद्यधिकरणसमासः अप्राहिता

२०

न्यादिः अत्र प्रत्यक्षपूर्वात्साम लोम्न इत्यत्र जितिप्रोग विभागं दर्श न म्रियंते अमराः देवाः मृङ् प्राणत्यागे अत्र वर्ततेषां प्रभुरम
रप्रभुः विश्वकर्म कृतिविषयोस्य विश्वकर्मा जगद्रचयित्वा दित्यधिकरणे पोवे वाल्लोके एतेषां पुरुषाणां कर्ता यस्य चेतत्कर्म
मस वेवेदितव्य इति श्रुतेः एतत्प्रत्यक्षामुपस्थितं जगत् यस्य कर्म कृतिविषय इत्येवं पतरतपाव्याख्यानस्य सिद्धांति
त्योत कृतः कर्मणी सर्वधातुभ्यो मनिनिति मनिना कर्मशब्दव्युत्पादनसंभवाच्च विश्वानि सर्वाणि सारथ्यादीनि क
र्माणि अस्य सः विश्वकर्मा स्वस्वरूपं भक्तस्वरूपं चानपेक्ष्य कृपयोच्चावचानि कर्माणि करोतीत्यर्थः इति तु नक्ताः
नदातु भावे मनिन् वोध्यः मनुते मनः मनज्ञाने औणादिकः उः नान्योतोस्ति मंतेति श्रुतेः संहारसमये जगतः स्मृतिं तनुं
करोति ष्टा तु रू जन करणे तृच् विस्को रितिकलोपः अतिशयेन स्थूलः स्थविष्ठः स्थूलस्थूलतरस्थूलतमा
दिरूपेण तस्यैव वर्तमानत्वात् सत्वं स्त्रीत्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि वि
श्वतोमुख इति श्रुतेः स्था धातोः क्तिनि नत्वप्रत्यये उत्पन्नात् स्थूलसाद्वात् अतिशयेनेष्टं स्थूलदूरयुवेत्यादि
ना यणादिपरलोपः पूर्वगुणयोर्वादेशो उक्तरूपं निष्पत्तिः स्थविरो ध्रुवः इत्येकं नमेतिभाष्यस्थ स्थविरो वृद्धः
अनादित्वात्त्हृष्टोपि ध्रुवो निर्विकार इति स्थविरो ध्रुवः अतिरा शिशिर शिशिर स्थूल स्थिर
स्फिर स्थविर खदिर द्रिजकिरजः धिकारस्य सूत्रेण तिष्टेन वुकि हृस्वतेच स्थ
विरः ध्रुवगतिस्थैर्ययोरित्यत्र ध्रुवेति पाठांतरादिगुपधेति कः स्थविरो
ध्रुवायेति चतुर्थ्यंतं १९

शब्देन मनसा वाचा न गृह्यत इत्यग्राह्यः यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इति श्रुतेः ग्रहउदानेन्द्रियैः बलेन
गृहीतुं शक्यो वा दुर्ग्राह्यः पाणिना वायुर्दुःस्पर्शः पाणिना शशाद् दुर्धरा पृथिवी मूर्ध्ना दुर्ग्राह्यः केशवो बलादिस्तु
योगपर्वी न्यैः परमेण दैवत्वान्नास्ति ग्राह्यो न्यो स्मात इति तु भक्तैः शश्वत् सर्वेषु कालेषु भवः शाश्वतः शाश्व
स्तु श्वतं शिवमच्युतमिति मंत्रात् शाशास्त्व नुगतो वा प्रवेशश्च छेदो व्ययं तत्त्वमं भवरूपेण कर्षतीति स्त्रीणां म
नः कृष्णः श्रुतमाद्योपियः स्त्रीणां प्रसह्याकर्षतीमेनः उरुगायोनुगीतो वा पश्यतो नां कुतः पुनरिति श्रीभ
गवतां कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः इति
६

ध्या

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः प्रभूतस्त्रिककुद्धाम पवित्रं मंगलं परम् २०

योगपर्वानुसारेण तु कृष्णो दर्शादित्वं भूवाचकः सद्वाचकः निर्वृतिर्वाचकः आनंदवाचकः तद्भावयोगात्सद
मयोगात् कृष्णो वर्णो ऽहमिये यस्मात्तस्मात्कृष्णोहमर्जुनेति वा कृष्णविशेषेणेन कृषेरेहाविति न कुलोहिते अक्षिणी
अस्य लोहिताक्षः परा प्रोत्तरा दिस्ये हिरण्मयः पुरुष इति प्रकृत्य तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी इति
श्रुतेः समां रूषभो लोहिताक्ष इति मंत्रवर्णाच्च प्रलये भूतानि प्रतर्दति प्रर्दयतीति प्रतर्दनः तर्दहिंसायामिति धातोः ज्ञानैश्व स्तु
र्यादिगुणैः संपन्नः प्रभूतः ऊर्ध्वाधोमध्यमभेदेन तिसृणां ककुभां धाम त्रिककुब्धामेत्येकं नाम वा ऊ प्रालनेरि
प्रत्ययात्रिशब्दः ककलौल्यं उभिप्रत्यये ककुवशब्दः उधाञ्धातोः राती मनिनिति श्रुतिश्चनियश्चेतिमनि
ति धामशब्दः तिसृणां ककुभां समाहारः त्रिककुप् तस्य धामेति विग्रहः भाष्यं तु कालेनार्थपरतया

म. भा.
११
रा. ध.

ने पंसमाहारद्विगवसंभवेमध्यमपदलोपिसमाससस्यांगीकारात्‌ प्रकृतेतु सत्यपि समाहारद्विगोन किं
चिदनिष्टमितिसमाहारः त्रिकं कुवेतस्य धामेतिविग्रहः भाष्यंतु कलितार्थः परतया ने द्विगरेवात्रे तिधी
भिहन्त्वेयंपुनातिपवित्रंपुवः संज्ञायांकर्त्तरिचार्षिदेवतयोरितिपाणिनिस्मरणात्‌ ... इच्चः पुधातोः
करणेइत्रोभवतिसंज्ञायामितिप्रथमसूत्रार्थः येनात्पेमुत्पूयतेयज्ञानामिकावेष्टनेतत्पवित्रमित्यु
दाहरणं अनंतगर्भि.णंसाग्रंकोशद्विदलमेवच प्रादेशमात्रंविज्ञेयंपावित्रंयत्रकुत्रचिदितिस्म
रणात्‌पूधातोरित्रः स्यात्कर्षौकरणेदेवतायांचकर्त्तरीतिद्वितीयसूत्रार्थः ऋषिर्विदः तदुक्तं
ऋषिणासूर्यआत्माजगतस्तस्थुषश्चेतीत्यत्रक्रमणोदर्शनात्संवुद्धोस्याकल्पस्येतावनार्षेइत्यत्रअ
नार्षिःप्रवैदिकइतिव्याख्यानाच्चपूयतेअनेनेतिपवित्रंमंत्रजातंपुनातीतिपवित्रंदेवताअग्निःपवित्रंस
मांपुनात्वितिउदाहरणं प्रकृतेतुकर्त्तरिदेवतायांबोत्पापोप्रत्ययः प्रसंगात्तुसूत्रव्याख्यानमुदाहरणं
चलिखितंस्मृतिमात्रेणयत्पुण्यंततोतिशुभसंततिं अशुभानिनिराचष्टेवृत्तंतन्मंगलंविदुरितिवि
ष्णुपुराणोक्तेः सर्वमंगलेभ्यउत्कर्षान्मंगलेपरं एकंनामेदमितिभाष्यकृतः मंगलैरजितैर्लक्ष्म
गिगतो अत्रपरमपदस्यमंगलविशेषणत्वात्सर्व.नामकार्यंतथाचचतुर्थ्यंतकरणेमंगलाय
परस्मेइतिभवतीतिवोध्यं २०

शिव
११

ईष्टे ईशानः सर्वभूतनियंतृत्वात् लटः शानच् शानचौ विति शाने च वर्तमाने लडित्यतो लट्ग्रहणमनुवर्तते संभवादधिके ल
ट्ग्रहणमधिकविधानार्थं तेन प्रथमासामानाधिकरण्येपि क्वचित् सत्त्वास्त्रयणः अस्तिब्रोहणमित्यादिकृदाहृतोत्री त्रासा
धुतांतां छोल्यो वानश्प्राणान् ददातीति चेष्टयति कालात्मना घाति खंडयतीति वा प्राणदः अन प्राणने अचनिते रितिणत्वं न
प्राणेनापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवंति यस्मिन्नेतावुपाश्रिताविति श्रुतेः प्राणिति प्राणः सूत्रप्राणः
रूपत्वात् तस्य त्वधीते दृधः इधुः वृद्धोग्र कर्म कर्तात्वके निरिक्तः अतिशयेन वृद्धः ज्येष्ठः सर्वकारणत्वात् वृद्धस्य चे
ति इष्ठनि ज्यादेशः अतिशयेन प्रशस्यः श्रेष्ठः प्रशस्य श्रेष्ठ इति श्रादेशः प्रशस्यत इति प्रशस्यः शंसु स्तुतौ भर्त्सने
कापृयतिस्तु शाप्यदजषः कारिति सूत्रे शंसुदुहिगुहिभ्यो वेति काशिकोक्तेः प्रशस्यस्य श इति निर्देशात् ईड उक्थशंस
दुहं ण्यत इति ज्ञापकं च समासिद्ध इतरयोस्तु मूलं मृग्यमिति अभियुक्ताः इति कथनीयं प्रजापते प्रजाः उपसर्गे च संज्ञा

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः २१

यामिति उः प्रजाः स्यात्संततौ जन इति कोशः पात्यसौ पाते उः इति प्रजानां पतिः प्रजापतिः हिरण्मयांतर्वर्तित्वात् हिरण्यगर्भः
समवर्तताग्र इति श्रुतेः ह्रियते हिरण्यं हृञ् हरणे रान्नेरण्यः अरण्यो श्वेति चकारादन्यप्रत्यये बाहुलकादिलं गणेति ख दुः
खंगर्भः गॄ निगरणे अर्तिगृभ्यां भन् गर्भो भ्रूणेर्भके कुक्षौ इति विश्वः भवतीति भूः सा गर्भो यस्य भूगर्भः पृथिवीकारणत्वात्
मायाः श्रियः पतिर्माधवः धुञ् कंपने अर्तिगृभ्यां भन् गर्भो मौनाध्यानाश्च योगाच्च विद्धि भारत माधवमिति व्यासः मधु
नामानामसुरं सूदितवान् मधुसूदनः कर्णमलोद्भवं वापि मधुनामं महासुरं ब्रह्मणोपचितिं कुर्वन् जघान पुरुषोत्त
तस्य नाम वधाद् देवदेवदानमानवाः मधुसूदन इत्याहुः ऋषयश्च जनार्दनमिति श्रीभारते मन्यते मधुः फलिमाटिन
मि मन्निजनौ पुक् यदि नाकि धतश्चेत्यनेन नकारस्य धकारादेशः उप्रत्ययश्च नंघादित्वात् ल्युप्रत्यये सूदनः प्रच
तुनेस्रदरीपदीत्यश्चेति निषेधात् स्वरे भेदः २१

न.भा

१२

ईश्वरः पुनस्तत्वादृगुणमैश्वर्यं नाथस्वाभाविकं परं निरस्तातिशयं यस्य तस्य स्तोष्यामि कित्वहमिति विष्णुपुराणे कालिया-
क्तेः विक्रम ऐश्वर्यं तदस्यास्तीति विक्रमी क्रमुपादविक्षेपे पृथ्मिनो पदा नोपदेशस्येति वृद्धिनिषेधः धन्वास्यास्तीति धन्वी कथिनपुदृषि
तात्सिराजि धान्विप्र इतिसूत्रेण सिद्धो धन्वशब्दः अधास्त्रियां धनुर्ध्रायो धन्वसनको दंड कार्मुकमित्यमरोक्तेः धनुः पर्याप्रस्ततो
व्रीह्यादित्वादिनिः धन्वी धनुष्मान्धानुष्क इति कोशः प्राशस्त्यार्थी निर्नार्शीदुः धनुर्लीभ धन्वी पार्थ इति वा पांडवानां धनंजय
इति गीता सुविदग्धत्वाद्वा धन्वीति तथा च श्रुतिः अस्मापामे धास्त्रजो विनिः मेधावी विना गरुडेन क्रमो गमनं यस्य स विक्रमः क्रामतिति । तिक्र
मः नास्त्युत्तमो यस्मादनुत्तमः दुःखेन शत्रुभिराधर्षितुं दुराधर्षः त्रिधर्षा प्रागल्भ्ये ईषद्दुःसुषिति खल् प्राणिनां पुण्यापुण्यात्मकं
कर्म कृतं जानातीति कृतज्ञः पुरुषः प्रयत्नरूपत्वात्कृतिः आत्मैवाधारत्वेनास्यास्तीत्यात्मवान्स्वे महिम्नि प्रतिष्ठित इति श्रुतेः २२
सुष्ठुराजन्ते सुराः राजृ दीप्तौ दुः तेषां देवानामीशः सुरेशः अरणातिहि नलिद्वः स्वमस्मिन्निति न वा शरणं अहिंसायां ल्युट् कर

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् २२ सुरेशः
शरणं शर्म विश्वरेताः प्रजाभवः अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः २३

णेधिकरणे वा सरणं गृह रक्षित्रोरिति कोशः अरणातिदुःखं दुःखो त्यादर्कं कर्म वैति शर्म सुखं न विदुः स्वामिभावकत्वस्य क
र्मनाशकत्वस्य च प्रसिद्धेः शर्म शान्तं सुखानि चेत्परमः परमात्मन एव मुख्यं सुखरूपत्वात्शर्मेति परमात्मनो मोपपद्यते त
रांत्रा विश्वरेताः कार्यमस्य विश्वरेताः सर्वकारणत्वात् रीगतिरेषणयोः सर्वधातुभ्योऽसुन् इत्यधिकारे सुरम्पां नट्ढ्चेत्प
सन्नत्रित्वरिणति गच्छतीति व्युत्पत्तेः भवत्यस्मात्भवः प्रजानां भवः प्रजाभवः हृदोरणप्रकाशरूपत्वादहरिवेग्रहः नेन
हातिग्रहः नजिनहातारातिकतिकनिनिन्नोयुपातिरत्वंसम्यग्वसत्यस्मिन्स्वरण धनपतिकालोऽप्रसंवत्सरः वहतीवा
ऽप्सरन्वेभ्रमेव्यालो उष्टगते स्पर्शइति हनायुध कोषाद् नवत्सर्वविदागहीतमशक्यः इत्यर्थो वा प्रतीतिः प्रत्ययः प्रत्य
नस्वरूपत्वात्प्रतिपृ वादिराङ्गता वित्यस्मादेरचसं वेदर्शपति स्वमत्कान्सर्वपश्यतिवा सर्वदर्शनः २३ २३ २३

श्रीव

नहिजातोनजायेऽहंनजनिष्येकदाचनः क्षेत्रज्ञःसर्वभूतानांतस्मादहमजःस्मृतः इतिभारतेनजायतेऽप्यजः अपिषवपिदस्य
तइतिदः सर्वेषामीश्वराणामप्यीश्वरः नित्यनिष्पन्नरूपत्वात्सिद्धः सिद्धगत्योगत्यर्थत्वात्कर्तरिक्तः येगत्यर्थास्तेज्ञा
नार्था इत्यभ्युपगमात्सिद्धिर्ज्ञानस्वरूपः किंनसर्वभूतानांकारणत्वात्सर्वादिः स्वरूपान्नच्यवतेऽप्रच्युतः च्युङ् गतौ शाश्व
तंशिवमच्युतमितिश्रुतेः यस्मान्नच्युतपूर्वोऽहमच्युतस्तेनकर्मणेतिभगवद्वचनाच्च १०० इतिनाम्नांशतंविवृतं इतः
परंश्रोतजाड्यतापरिहारायव्याकरणंस्वल्पमेवलिख्यते वर्षतिसर्वकामान्वृषोधर्मः इगुपधेतिकः ...ता...रामे

अजःसर्वेश्वरःसिद्धःसिद्धिःसर्वादिरच्युतः वृषाकपिरमेयात्मासर्वयोगविनिःसृतः २०

अपात्कपिः वहीरायाधातोरच्वङः वाहुलकादाल्लोपः वृषश्चासौकपिश्चवृषाकपिरन्येषामपिदृश्यतेइतिदीर्घः आ
उ·प्रश्लेषोवाकपिर्वराहः श्रेष्ठश्चधर्मश्चवृषउच्यते तस्माद्वृषाकपिंप्राहकश्यपोमांप्रजापतिरितिव्यासवचनं स्मृतः स
न्वर्षतिकामानांऽकंपयतिचलोकान्वृषाकपिरितितु विष्णुपिते: प्रश्निनगर्भःसर्वदेवउरुक्रमः वृषाकपिर्जयंतश्चेतेका
श्यपद्येश्रीधरस्वामिनः तत्रणिजंतादच्प्रत्ययेषांवाहुलकाद्यम्लोपः वृषोरिष्टतांमात्सरः तमाकंपयतीतितु
भक्ताः इपानितिमातुंपरिच्छेत्तुंनशक्यआत्मास्वरूपमस्याप्रमेयात्मासर्वेभ्योयोगेभ्यः संबंधेभ्योविनिःसृतः असंगोह्य
यंपुरुषइतिश्रुतेः २४

म.भा.
१३
दा.ध.

वसंतिसर्वभूतान्यस्मिन्वसतिवासर्वभूतेषुवसुः वसूनामस्मिपावकइत्युक्तोवावसुः शब्देनधनवाचिनाप्रशस्तंरागादिभिः
ल्केशैरकलुषितंमनोस्यवसुमनाः वसौभीष्मेमनोस्येतितुभक्तौः श्रो तस्यगतोभीष्मःश्रोस्यंनिर्वहन्ताशनः मांयातिपु य
रुषव्याघ्रनतोमेनदृतंमनइतिराजधर्मोक्तेः अवितथरूपत्वात्सत्यःसत्यंज्ञानमनंतमितिश्रुतेः मूर्तामूर्तात्मक
त्वाद्वासच्चत्यच्चाभवदितिश्रुतेः अस्मिन्पक्षेपादसत्तारूपसिद्धिः पूर्ववत्तुतत्रपूर्वसाधुरितियत्प्रत्ययेसत्य
वृसिद्धिरितिबोध्यं समएकश्चासावात्माचसमात्मा आत्मेतिविद्यादितिश्रुतेः संमितःअसंमितइतिवाछेदः
सम्यक्शास्त्रेणमितःप्रतितइत्याद्येपक्षेअर्थः द्वितीयेत्वपरिछिन्नइत्यर्थः सर्वेषुकालेषुसर्वाकाररहितत्वा
त्समः मयातुल्यासहेतिवा अमोघः अवितथसंकल्पइतिश्रुतेः हृदयाख्यंपुंडरीकंअश्नुतेव्याप्नोतिपुं

वसुर्वसुमनाःसत्यःसमात्मासमितःसमः अमोघःपुंडरीकाक्षोवृषकर्मावृषाकृतिः २५
रुद्रोवहुशिरावभ्रुः

डरीकाक्षः अक्षव्याप्नोवृषोधर्मस्तद्रूपंकर्मास्यवृषकर्मा वृषायधर्मायआकृतिः धर्मसंस्थापनार्थायसं
भवामियुगेयुगइतिभगवद्वचनात् २५ संहारकालेप्रजाः रोदयतिरुद्रः अंतर्भावितण्यर्थात्रुदेरक्सौराह
घदर्शो दान्तः रुद्रस्यरुद्रत्वमितिश्रुत्वानुसारेतुरोदितिरुद्ररितिबोध्यंशिवविष्णोरभेदख्यापनायअगणितनामां
तकेगोविंदयानिलोकेमहान्तिच तान्येवममनामानिनात्रकार्योविचारणेतिरोदनेरुत्संपदादिःरुदं
यतिरुद्रः रुदंद्रावयतेयस्मात्तस्मात्रुद्रोजनार्दनइतिवृहत्सांडोक्तेः उधातोडेप्रत्ययेरुद्रुइतिदकारस्यमिते
ह्यपसिद्धिः वहूनिशिरांस्यस्यवहुशिरः सहस्रशीर्षाःपुरुषइतिश्रुतेः विभर्त्तिलोकान्वभ्रुः शिव
निमघोमघोमघोपठ्यते उक्तंचहरिवंशकेत्वासमयाञायांसदाशिवेनश्रीकृष्णप्रतिनामानि ४

विश्वस्ययोनिस्तूपादानकारणंविश्वयोनिः शुचीनिश्रवांसिनामान्यस्यशुचिश्रवाः शुचीनिश्रृणोतिवाशुचीनिश्रवणी

यानिश्रृणोमीहधनंजय नचपापानिगृह्णामिततोहंवैशुचिश्रवाइतिमोक्षधर्मेषुनास्तिमृतंमरणमस्यामृ

तःअजरोमरइतिश्रुतेः शाश्वतश्चासौस्थाणुः सर्वकालसंबंधीसर्वदेशसंबंधीचेत्यर्थः शाश्वतःस्थाणुरित्यत्र शा

चविसर्गरहितएवपाठोभाष्यकृदुक्तेः कर्मधारयवन्नास्त्रीयतेतेनचतुर्थ्यंतकरणेशाश्वतःस्थाणवेइतिभवति

ननुशाश्वतस्थाणवइतिबोध्यंवरःआरोहणमास्मिन्वरारोहः ब्रह्मप्राप्तानांपुनरावृत्त्यभावात्नसपुनराव

र्ततइतिश्रुतेः महान्सर्वेभ्यस्तपोविषयंतपोज्ञानंमहातपाः २६ सर्वत्रगच्छतीतिसर्वगः सर्वंवेत्तीतिसर्ववित्भा

तिसर्वत्रभानुः सर्वविच्चासौभानुश्चसर्वविद्भानुः सर्वत्र सन्सर्वसदाभासतइतिनामार्थः अत्र

विश्वयोनिःशुचिश्रवाः अमृतःशाश्वतःस्थाणुर्वरारोहोमहातपाः २६ सर्वगःसर्व

विद्भानुर्विष्वक्सेनोजनार्दनः वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः २७

सर्वविद्भानवइतिभवतिननुसर्वविदेभानवइतिलाघवात्विष्वक्सर्वतः अंचंतिपलायंतेविष्वक्त्वात्तादृशीसेना

जरासंधादीनामनेनविष्वक्सेनः पुंवद्भावेनडाप्निवृत्तौतन्निमित्तकार्यनिवृत्तेः साधुताजनान्दस्यून्अर्दयति

हिनस्तिजनार्दनः दस्युनाशाज्जनार्दनइत्युद्योगपर्वणिवेदयतितत्त्वंज्ञापयतिवेदः तेषामेवा

नुकंपार्थमहमज्ञानजंतमः नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वताइतिभगवतोक्तेः वेदसमग्रमर्थतः

पाठतश्चवेत्तिवेदवित्किंविधत्तेकिमाचष्टेकिमत्रपविकल्पयेत इत्यस्यहृदयंलोकेनान्योमद्वेदकश्च

नेत्येकादशैःसर्वैः अंगैःप्रतीकैः साधनैःपुराणैर्लोकैर्वापूर्णः अव्यंगः वेदाः अंगानिपार्षदप्रायाण्यस्यवेदां

गः कृत्स्नंचतत्रछंदोभिःस्तूयमानंसुविस्मिताइतिदशमोक्तेः वेदान्विंदतिलभतेसांदीपनेरितिपुनःवेदवि

सभाः
१४
दा.ध.

लोकानध्यक्षयति प्रत्यक्षीकरोति लोकाध्यक्षः सुराणामिंद्रादीनां सात्विकानामध्यक्षः प्रत्यक्षः सुराध्यक्षः तत्रा
पिकथमतआह धर्मेणभगवद्धर्मेणाध्यक्षः धर्माक्षः कृतकार्यरूपेणकृतः कारणरूपेणकृता कृतः सर्गा
दिषु एषकरयकृचत्वारआत्मनः स्वरूपाणि विभूतयोस्य चतुरात्मा ब्रह्मादक्षादयः कालस्सर्वाधिनतंनवः। विभूतयोहरेस्ता
तेजगतः सृष्टिहेतवः। विष्णुर्मन्वादयः कालः सर्वभूतानिच द्विजा। स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः रुद्रः कालोंत
काद्याश्च समस्ताश्चैवजंतवः चतुर्धा प्रलयायैता जनार्दनविभूतयः इति विष्णुपुराणे व्यूहात्मानं चतुर्धैव वासुदेवादिनामभि
: सृष्ट्यादीन्प्रकरोत्येष विश्रुतात्मा जनार्दन इति व्यासवचनाच्चतुर्व्यूहः वासुदेवप्रद्युम्नानिरुद्धसंकर्षणा वासुदेवादयः चतु
च

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः २८
भ्राजिष्णुर्भोजनंभोक्तासहिष्णुर्जगदादिजः अनघो विजयो जेता विश्वयोनिः पुनर्वसुः २९

र्व्यूहोस्य चतुर्दंष्ट्रः नारसिंहविग्रहः चतुर्भुजः स्पष्टः २८ प्रकाशैकरसत्वात् भ्राजिष्णुः श्यामत्वादिनात्यंतंभ्राजन्श्रीलो
भ्राजिष्णुरतसीपुष्पसंकाशः पीतवासा जनार्दनः अभ्राजत सभामध्ये हेम्नीवोपहितो मणिः इतुद्योगपर्वणि इ
तितुभक्तोः भुज्यते भोजनं भोगरूप इत्यर्थः भुक्तो भोक्ता सहिष्णुः सहनशीलः न सहते भक्तानांपीडां सहिष्णु
रिति भक्ताः एकतो धातवे चक्रमेकतो हरिवाहनं एकतो विष्णुधाताच वैष्णवे वादिते मयेति एवमवचंतो
हिरण्य[illegible]गर्भरूपेण जगदादौ जायते जगदादिजः अनघो निःपापः वितयते ज्ञानवैराग्यैश्वर्यादिभिर्विजयः
जेता सर्वोत्कृष्टः विश्वश्चासौ योनिः च पुनर्विश्वयोनिः पुनः पुनर्वसतिति तत्तदवतारेषु पुनर्वसुः २९

शिव
१४

इंद्रमुपगतोनुजत्वेनउपेंद्रः ममोपरियथेंद्रस्त्वंस्थापितोगोभिरीश्वरः उपेंद्रइतिकृष्णत्वांगास्यंतिभुविदेवतींद्रइतिहरिवंशेबलिं
वामनुरूपेणयाचितवान्वामनः स एवजगत्त्रयंक्रममाणःप्रांशुरभूदितिप्रांशुः तोयेतुपतितेहस्तेवामनोभूदवामनः सर्वदे
वमयंरूपंदर्शयामासवैप्रभुः भूःपादौद्यौः शिरश्चास्यचंद्रादित्यौचचक्षुषीइत्यादिनाविश्वरूपंदर्शयित्वातस्यविक्रमतोभू
मिचंद्रादित्यौस्तनांतरे अधःप्रक्रममाणस्यजानुन्यवस्थितावित्यादिनाप्रांशुत्वंहरिवंशेप्रदर्शितं नमोघः कदाचित्पुन
रमोघः भक्तकल्पवृक्षत्वान्नतस्यकश्चिद्दयितःसुहृत्परमोनवाप्रियो द्वेष्यउपेक्ष्यएववातथापिभक्तान्भजतेतेनतथाहियासुर
द्रुमोम्बवृक्षयाश्रितोर्थदइतिदशमेअतिपवित्रत्वात्सर्वेषांचियुधिष्ठिरादीनांसचिवइतिवापावकेभ्यःशुचिर्मोस्यमातेवासुप
थइत्युमरोक्तेः उपधामुक्तोत्तमतिक्रांतिः अप्सुपद्येयमन्यसेमातुलेयंप्रियंमित्रंसुहृज्जनंअकरोःसचिवयंहतंसोहदाद्य

उपेंद्रोवामनःप्रांशुरमोघःशुचिरूर्जितः अतींद्रःसंग्रहःसर्गोधृतात्मानियमोयमः ३० वेद्योवैद्यःसदा
योगीवीरहामाधवोमधुः अतींद्रियोमहामायोमहोत्साहोमहाबलः ३१

सारथ्यमितिप्रथमे गोवर्द्धनोद्धरणादिषुबलवत्वादूर्जितः ऊर्जबलप्राणनयोः पारिजातहरणाद्याविंद्रमतिक्रांतोतींद्रः
संगृह्णातिभक्तान्संग्रहः सृज्यतइतिसर्गः कार्यरूपः एकरूपेणजन्मादिरहिततयाधृतआत्मानेनधृतात्मास्वेस्वेअ
धिकारेप्रजानियमइतिनियमः अंतर्यच्छतिसर्वांतर्यामित्वात्यमः ३० अज्ञातत्वेनवेदनार्हत्वात्वेद्यः विद्याःसर्वा
अधीतेवैद्यःसदायोगीवसयोगीसर्वक्रियाकर्तृत्वेपिवस्तुतोकर्तृत्वात वीरान्दैत्यान्हंतिवीरहामायाःभगवद्विद्यायाः
धवईशोमाधवः माविद्याचहरेःप्रोक्तातस्याईशोयतोभवान् तस्मान्माधवनामासिधवःस्वामीतिशब्दितइतिहरिवंशेयद्वा
मधुपराप्रीतिमुत्पादयति तथाऽयमपीतिभाष्योक्तेः मधुइत्यविसर्गांतः पाठोभातिसविसर्गपाठेतुवसंतः अप्रमत्तत्वादकः
इंद्रियागोचरत्वादतींद्रियः मायाविनामपिमोहकारिणीमहतीमायाऽस्यमहामायामममायादुरत्ययेतिभगवदुक्तेः म
हतीमायाकृपास्येतिभक्तोमायादंभेकृपांचेतिविश्वः अहोवय मित्यादिनापराधेष्वपिक्रियावगमात् महानुत्साहोऽस्य

भा॰
दो॰ ध॰ टी॰
१५

महतीबुद्धिरस्यमहाबुद्धिर्महदविद्यालक्षणंवीर्यमस्यमहावीर्यः महत्यःशक्तयोस्यनतत्कार्यानुगुणाःमहाशक्तिः महती
द्युतिः कांतिरस्यमहाद्युतिः इदंतदनिर्देश्यवपुस्वरूपमस्यानिर्देश्यवपुः सर्वबाधावपुःसर्वबाधावधित्वेनैवतत्सिद्धेरेश्व
र्यलक्षणाश्रीनित्यमस्यास्तिश्रीमान्पुनःअमेयाविदविषयःचिद्रूपत्वात्तादृशआत्मासर्वप्रत्यक्रूपत्वात्सप्रमेयात्मा
महांतमद्रिंगोवर्द्धनंमंदरंवागोरक्षणेअमृतमथनेवाधृतवान्महाद्रिधृक् अत्रश्रीमहाभाष्यटीकांतरे
चधृञ्धातुनाविग्रहेदर्शयित्वाकांतयेमेवमूलव्याख्यानयोपलभ्यतेअभियुक्तपाठोपिकांततयैवोपलभ्यतेनततीन
तयानेनेदमार्षिकार्यप्रदर्शनंनतधाञधञोःधातोप्रवेशः। किंतुमहाद्रौधृष्णोतिप्रगल्भतिमहाद्रिधृक् ञिधृषा

महाबुद्धिर्महावीर्योमहाशक्तिर्महाद्युतिः अनिर्देश्यवपुःश्रीमानमेयात्मामहाद्रिधृक ३२
महेष्वासोमहीभर्ताश्रीनिवासःसतांगतिः अनिरुद्धःसुरानंदोगोविंदोगोविदांपतिः ३३

प्रागल्भप्रागल्भ्ये। क्विनप्रत्ययस्येतिकुत्वंक्विन्प्रत्ययोपस्मात्क्रियतेकदाचित्तस्यकर्मोत्तादेशइतिव्याख्यानेन
क्विनेतंविनापिकुत्वस्वीकारात्महाद्रिधृषेइतिचतुर्थ्यंतं ३२ महान्इष्वासइषुक्षेपोधनुर्वास्यमहेष्वासःम
हीविभर्त्तिमहीभर्ताश्रीःलक्ष्मीःतस्याःनिवासःश्रीनिवासःसतांसज्जातीनांगतिःप्राप्यःसतांगतिः नके
नापिप्रातुणाकापिनिरुद्धःअनिरुद्धःसुरान्आनंदयतिसुरानंदःगोविंदः नष्टांवैधरणींपूर्वमविंदंय
द्गुहांगतां गोविंदइतितेनाहंदेवैर्वाग्भिरभिष्टुतइतिमोक्षधर्मेषु गवादिषुविदेःसंज्ञायामितिसाधुना अह
किलेंद्रोदेवानांत्वंगवामिंद्रतांगतः गोविंदइतिदेवास्त्वांस्तोष्यंतिभुविशाश्वतमिति गोरक्षामवतोप्राणांताव
वेदपतेर्भवात् गोविंदस्ततोदेवमुनिभिःकथ्यतेभवानितिचहरिवंशेएतदनुसारेणपृषोदरादित्वेगोधेंदवा

१५

श्रियं तं दुष्टान्प्रनेममरीचिः मरुः प्राणस्त्यागेणाणादिकर्इविजिपांसचेन मासायमवस्यंतस्यग्रोपतं गवदिति दुष्टानमहत्यदशमो ह्लेः
दर्शयति दुष्टान्दमनः शुद्धत्वाद्धंस इव हंसः सदसद्विवचने क्षीरनीरविवेचकहंस इव वा हानि संसारवंधं वा भवेद्यगणे गम
त्वंस इत्याभियुक्तोक्तेः हंसा न धातोरूपम् अहंस इति भावितो हंस इति तु श्रीनरा तिस्तत्रपरोक्षाद्दत्वा याकारलोपो द्रष्टव्यः सुपर्णः
पक्षी स इव सपर्ण द्वा सुपर्णा इति मंत्रवर्णात् भुजगोत्तमः शेषरूपत्वाद्धिरण्यवत्प्रकाशमानं सो तं हिरण्यं ब्रह्माण्डनाभावुदरे यस्य
हिरण्यगर्भरूप इति वा सुसुष्ठु तपो रस्य पतं नरनारायणरूपस्य सुतपाः प्रजानां प्रद्युम्नादीनां पतिः प्रजापतिः पुनः प्रजाना
न्संततो जन इत्यमरः मरीच्यादिरूपत्वाद्वा ३४ नास्ति मृत्युर्यस्य अमृत्युः सर्वं पश्यतीति सर्वदृक् हिनस्तीति सिंहः दंतवक्रादि

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ३४ रि
अमृत्युः सर्वदृक्सिंहः संधाता संधिमान्स्थिरः अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ३५

दुष्टमारकत्वात्सिंह इव पराक्रमशाली वा इति द्वितीयं शतं २०० संधाता संधिकर्ता युधिष्ठिरदूतरूपत्वात्तथा
पसंधिमान् लोकावाक्यतात्पर्यमेव दोस्य करणात्तभक्तोतः करणेस्थिरत्वात् अजइवाजः पुनः अजनामेकामितादिमंत्रैः छाग
रूपत्वोक्तेः अजातिक्षिपति॰शम्भुपालवधायचक्रमित्यज इति तु भक्ताः सत्वद्वाभावप्रसंगात्तसम्पर्क्य एतत् छागवाचित्व
मा वद इवा त्वापि बीजाभावाभावं समाधीयमिति ते रुक्तं तस्य टेषु युक्तं न योगिके च ह्रते तद्रूपे मलके गोणी वृत्तिरिति ध्ये
यं दुःखेन मर्षितुं सो दुःशक्यो दुर्मर्षणः देवैर्मनुष्यैर्गन्धर्वैरसुरैरुरगैश्चयः न सोढुं समरे शक्यस्तेन बुध्यन्ति यः शाव
मितुयोग्यं एवं लिं शास्ता दुष्टानां दण्डकरः विश्रुतः शास्त्रप्रसिद्ध आत्मा विराट् देही यस्य विश्रुतात्मा सुरारीन्नरकादीन् सु
रारीन् हन्तीति सुरारिहा ३५

वि.भा.
२६

गुणात्पुपदिशतीति भक्तियोगमुद्दर्वाज्जिनो प्रति गुरोः उपदेष्टॄणामपि मंधोः श्रेष्ठता द्गुरुत्तमः धत्ते सर्वं धाम परं ब्रह्म परं धामेति वचनात्
सत्यं त्रिकालोवाध्यः सत्यपराक्रमः अप्रतिहतसामर्थ्यः नितरां मिषति पश्यतीति निमिषः अनेरवानिमिषः अक्षिप स्तवनेन दिक
दाचिद्दर्शनमदर्शनं च नास्यात तदिति सर्वदा दर्शनमेव पुनः स्रक वैजयन्ती सास्यास्तीति स्रग्वी विस्पष्टं भगवता नेन दसु सर्वधा
तिवे उरसा प्रतिजग्राह पार्थ संस्याद्य केशवः वैजयंत्यभगवन्मालानां दस्त्रं केशवोरसीति द्रोणपर्वणि वाचो वेदरूपायाः
पतिः वाचस्पतिः षष्ठ्याः पतिपुत्रेति सत्वविधानात्षष्ठ्या अलुक् अनेनैवोदाराम हती बुद्धिरस्य उदारधीः उदारा महतो
च रितिविश्ववोस्य रुदारधीरित्येकं नामीत्याचार्याः वाचस्पतउदारधिये इति चतुर्थ्यते ३६ अग्रे अग्रादौ नापते प्रज्ञ्पते
ति

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः निमिषो निमिषः स्रग्वी वाचस्पतिरुदारधीः ३६
अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात ३७

अग्रणीः धातूनामनेकार्थत्वाद्बाहुलकात्कर्मणि क्विप् भाविष्यतां वर्तनां चैव भारते सर्वेषामग्रणी विष्णुः सेव्यः
मुमुक्षुनित्यशस्तिमोक्षधर्मेषु ग्रामं मयूरांश्च समहं नयति प्रापयति द्वारकां ग्रामणी श्रेष्ठो वा: ग्रामणीर्नीपि
तेपुंसि श्रेष्ठे ग्रामाधिपे त्रिष्वित्यमरः क्रमवसामानि यज्ञैषि सांहिंश्रीस्मृतानि सतां मित्युक्तोः श्रीरस्यास्ति श्रीमान् न्या
नः नितरां मीयते गम्यते श्रुतिस्मृतिपुराणेनान्तुर्यविषयतया न्यायः नयति प्रापयति कर्मफलं नेता एवं वा
धनाशिनि रितिश्रुते सम्यगीरणं भाषणमस्य समीरणः सहस्रमूर्धा विराट्स्वरूपेण विश्वस्यात्मा स्वस्वरूपं विश्वा
त्मासवाधिष्ठानत्वात् सहस्राणि अक्षाणि अस्य सहस्राक्षः सहस्रपात् अनेकाक्ष्यस्य सहस्रपात्संख्यासप्त वस्येति

तिस्वपितिवाश्नन्स्वप्रदेयपाणयोरितिधातुः तथाहमपि तच्छ्रितो निद्रां च न लभे निश्वासमुक्तेः धरति ५

आवर्तते धर्मरक्षार्थं पुनःपुनः संभवति आवर्तनः निवृत्तः परमवैराग्यपरायणो आत्मा चित्तमस्य निवृत्तात्मा यस्यैन्द्रियविमथि
तं कुहकैर्लिनक्षोकुरितिसुक्तेः निवृत्ताः पातिमिवार्यमाणा अपि निवृत्ताः वृजसीयं तिन्यस्तासु आत्मा चित्तमस्येति भक्ताः सं
वृतो योगमायया आछादितः नाहं प्रकाशः सर्वस्य योगमायासमावृत इत्युक्तेः संप्रमर्दयति दुष्टान् संप्रमर्दनः अहः निसं
वर्तयति सूर्यरूपेण अहः संवर्तकः वहति हुतं हविर्देवान् अग्निरूपेण वह्निः अग्निमुखा वै देवा इति श्रुतेः न विद्यते इलः अस्य अ
निलः कंसं निर्जित्य उग्रसेनाय च पृथ्वी दानात रुक्मिणीगतं वित्तं तवी मनद्इलौ धरो धरण्या धरणीधरः अनंतरू

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः अहः संवर्तको वह्निरनिलो धरणीधरः ३८
सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ऽऽ

पेण वराहरूपेण वा ३८ शोभनः सर्वालभ्यतानिवारकः प्रसादोस्य स सुप्रसादः किमलभ्यं भगवति प्रसन्ने अस्मि नि
केतन इत्युक्तेः प्रसन्नो भक्तापराधैरकलुषितः आत्मा चित्तस्य प्रसन्नात्मा विश्वस्मिन् धृष्टोति प्रगल्भते विश्वधृक्
विश्वधरणाद्विश्वधृक् इति भाष्ये त्वर्षिकाभिप्रायेण सर्वेषु पुस्तकेषु शिष्टैश्च विश्वधृगित्येव पाठात् विश्वं भुन
क्ति पालयति विश्वभुक् विविधं भवति विभुः सत्कृतः पूजयति धर्मरक्षार्थं गोब्राह्मणान् सत्कर्ता सत्कृतः पूजितैरपि
पूजितः न्यायकर्मभिरेव साध्वीति परकार्यसाधुः जनान् संहारसमये हृते अपनयति जह्नुः पृषोदरादिः वीस्वा गंगा
जहयस्मात् द्वरितोरित इति पौराणिकाः इदं च सर्वाः श्रुतयः तत्र निविष्टा भगवत एवेति सिद्धान्ताभिप्रायेण पोऽन्यं ऽऽ

१३ मा

२१

टी.ध.टी

नारायणः नरजातानि तत्वानि नाराणीति ततो विदुः तान्येवचायनं तस्य तेन नारायणः स्मृत इति भारते नारायणो मयनं यस्मात्त
स्मात्तन्नारायणः स्मृत इति ब्रह्मवैवर्ते आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति
मानवे नारायणाय नम इत्ययमुपेवसत्यं संसारविषसंहरणाय मंत्र अष्टएवं तु मया मत पो यनयोस्तरागाउच्चैस्तरामुपदिशाम्य
हं ऊर्ध्ववाहुरिति नारसिंहे नियतिवरः प्रोक्तः परमात्मा सनातन इति र्व्यासः ३९ न संख्येयः कथनीयः शब्दागोचरत्वादसं
ख्येयः अप्रमेयः फलाव्याप्यत्वात्तादृशात्मा अप्रमेयात्मा विशिष्यते सर्वेभ्योऽतिरिच्यते विशिष्टः शिष्टं वेदोक्तं कर्म करोति
शिष्टकृत् शिष्टानेकरोति पालयति वासामान्यार्थो धातुर्विशेषपरो दृष्टः कुरुकाष्ठानीत्याहरणोपयोग्यपि भाष्योक्तशि
ष्टानपि शिष्टान्करोति तु भक्तो अपि अपि चेत्सुदुराचार इति भगवद्वचनात् शुचिः अंगाराइव पुनः शुचिः शुद्धेनुपहते अंगा

सत्कर्त्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ३९ असंख्येयोप्रमेयात्मा विशिष्टः शिष्टकृत्शुचिः सिद्धा
र्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ४० वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः वर्द्धनो वर्द्ध
मानश्च विविक्तः श्रुतिसागरः ४१

राषाद्योः सितेः ग्रीष्मे हुतवहेपि स्यादुमधास्तु हृतं त्रिणीति विश्वः सिद्धार्थोऽर्थमानोस्य सिद्धार्थः सिद्धसंकल्पः सिद्धमुक्तिं
ददाति सिद्धिदः सिद्धिं च त्रैवर्गिकमविफलमानुषंगिकतया साधयति सिद्धिसाधनः ४० वृषो धर्मस्तद्रूपः अहः द्वाद
शाहादिः तदस्यास्ति वृषाही वर्षति कामान्वृषभः वेवेष्टि पादं चक्रमणेन पुनर्विष्णुः वृषो धर्म एव सोपानपर्व यत्प्राप्ते
स्तत्रतीतेः वर्धयति भक्तैः कृतमल्पमपि वर्द्धनं किंचित्करोतु र्वविपस्वदत्तमिति दशमे स्वदतो किंचिदपेउरु द्रुरोतीत्य
नयः स्वैर्भक्तैः दत्तं स्वप्रपंचस्वरूपेण वर्धमानः एवमपि विविक्तः पृजः विविक्तो पृतो विजना दितिकोशात श्रुतिसागर इ

श्रुतिसागरः श्रुतिकारणत्वात् श्रुतितात्पर्यविषयत्वाद्वा ४१

शिव

७

शोभना भुजा अस्य सुभुजः दुःखेन हृदये धार्यते मुमुक्षुभिर्दुर्धरः प्रशस्ता वागस्यास्तीति वाग्मी महांश्चासाविन्द्रो महेन्द्रः वसु धनं
ददातीति वसुदः दीयमानं वस्वपि स एवेति पुनर्वसुरिति भाष्ये तत्र पुंस्त्वमार्षं वसन्ति नितरां मथुरायां वसुर्वा नैकानि रूपाण्यस्य
नैकरूपः बृहद्वसुधा तत्कं विभ्रद्यस्त्व वाराहरूपमस्य बृहद्रूपमस्य बृहद्रूपः शिपिः पशवस्तत्र यज्ञरूपेण विष्टः प्रतिष्ठि
वि तः शिपिविष्टः यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति श्रुतेः शेत्पाच्छपनयोगाच्छशीति वा रश्मिपञ्चरस्तेन
त्यानाद्दृश्यत्वेन शिपयो मताः तेषु प्रवेशाद्विष्णुः शिपिविष्टः इहोच्यते इति पुराणे प्रकाशयतीति प्रकाशः ४१ ओजः
प्राणबलं तेजः प्रतापः द्युतिर्देहकान्तिस्ताः धारयतीत्योजस्तेजोद्युतिधरः ओजस्तेज इति नामद्वयं बलं बलवतां चाहं

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ४२ ओजस्ते
जोद्युतिधरः प्रकाशात्मा प्रतापनः ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ४३ अमृतांशूद्भ
वो भानुः शशबिन्दुः सुरेश्वरः औषधं जगतः सेतुः सत्यधर्मपराक्रमः ४४

तेजस्तेजस्विनामिति भगवद्वचनादित्यपि भाष्ये तत्र विभागः सर्वाणि प्रकाशयतीति प्रकाशस्ता दृगात्मा विग्रहोस्य प्रकाश
त्मा सवित्रादिभिर्विभूतिभिः प्रतापयतीति प्रतापनः ऋद्धः परिपूर्णः स्पष्टमक्षरं प्रणवरूपं वाचकमस्य स्पष्टाक्षरं मन्त्रं बोध
त्वान्मन्त्रः मन्त्रपतिवा मन्त्रयन्ते चकास्मिन्नेत्रिभिर्वेदादिभिरिति दग्धमेशान्तमानानां चन्द्रस्यांशुरिवाह्लादकश्चन्द्रांशुः भास्क
रस्येव द्युतिरस्य भास्करद्युतिः ४३ उद्भवत्यस्मादुद्भवः अमृतांशोः चन्द्रस्य उद्भवः समुद्रमथनेन चन्द्रोत्पादकः अमृतांशूद्भ
वः भातीति भानुः शशाङ्कवद्बिन्दुर्लाञ्छनमस्य शशबिन्दुः स एव सर्वौषधिपोषकः पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसा
त्मकः इति भगवद्वचनात् सुराणां देवानामीश्वरः सुरेश्वरः संसाररोगनिवर्तकत्वादौषधः जगतः सेतुरिव जगतः सेतुः

भूतभव्यभवन्नाथः स्पष्टः पवनः वायुरिव पवनः पवतामस्मीति वचनात् पावयते पावनः भीषास्माद्वातः पवनः इति श्रुतेः
अनात् प्राणान् आत्मत्वेन लाति गृह्णातीति अनलः सकलजीवनिकायरूपः जीवपरमात्मनोरभेदात् अनलो ग्निरिति वे
ति [illegible] वा भक्तानां कामांस्तद्विषयाभिलाषात्स्वरूपप्रदानेन हंतीति कामहा कामं प्रद्युम्नं करोतीति कामकृत कांतः सुंदरः कांतो ह्यमनि
प्रियेचारीति विष्वः काम्यते मुमुक्षुभिरपि कामः कामान् प्रकर्षेण ददातीति कामप्रदः प्रकर्षेण दिव्यरूपतया भवतीति प्रादुर्भव
ति पुनः पुनः तमद्भुतं बालकमंबुजेक्षणमिति दशमोक्तेः ४५ युगादि युगारंभं करोतीति युगादिकृत इति तत्तीयं नाम्नायात

भूतभव्यभवन्नाथः पवनः पावनो नलः कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः ४५ युगादि
कृद्युगावर्तो नैकमायो महाशनः अदृश्यो व्यक्तरूपश्च सहस्रजिदनंतजित ४६

युगादिकृतादीन्पाऽवर्तयति कालात्मना युगावर्त्तो नैकमायो बह्वीमायाः इंद्रो मायाभिः पुरुरूप ईयत इति श्रुतेः प्रतिजीवम
विद्याभेदाभ्युपगमात् महदशनमस्य महाशनः यस्य ब्रह्म च क्षत्रं च चोभे भवत ओदनः मृत्युर्यस्योपसेचनमिति श्रुतेः
अदृश्यो ज्ञानेंद्रियानां तत्र हेतुरव्यक्तरूपः सच्चिदानंदरूपः कारणरूपो वा व्यक्तरूप इति वा छेदः तत्र स्थूलरूपोपी
त्यर्थः सहस्राणि असुराणां जयतीति सहस्रजित एवमनंतजित ४६

इष्टः परमानंदस्वरूपत्वात्सकलेच्छाविषयः सर्वैः पूजित इति वा इषद्ध इच्छायायज देवपूजासंगतिकरणदानेष्वित्यादिभ्यां इ
ष्टशब्दोत्पत्तेः सर्वांतर्यामित्वादि विशिष्टः शिष्टानां विदुषामिष्टः शिष्टेष्टः प्रियो हि ज्ञानिनोऽत्यर्थमिति भगवद्वचनात् शिखंडो
मयूरपिच्छं सोऽस्यास्ति गोपवेषधरस्यालंकारशिरोमणित्वेन शिखंडी नह्यति भूतानि मायया नहुषः वर्षति कामान्वृषः वृ
षो हि भगवान्धर्मः स्मृतो लोकेषु भारत नैघंटुकपदाख्यातैर्विद्धि मां वृषमित्युतेति महाभारते भक्तानां क्रोधं हंतीति क्रो
धहा असाधुषु क्रोधं करोतीति क्रोधकृत् कार्यमात्रस्य कर्तृत्वात्कर्ता क्रोधकृतां दैत्यादीनां कर्ता छेदक इत्येकं वा नामेति

इष्टो विशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ४७
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ४८

भाष्ये इदं च विभागसंवादि विश्वे त्रैलोक्यवर्तिनो वा हनोऽस्य विश्वबाहुः महीं पूज्यां धरतीति महीधरः ४७ भक्तेभ्यः
कदापि न च्युतः अच्युतः तस्याहं न प्रणश्यामि स च मे न प्रणश्यतीत्युक्तेः सौर्गुणैः प्रसिद्धत्वात्प्रथितः प्रकर्षेणानिति
शब्दायते पुनः प्राणः मेघगंभीरया वाचेति दशमोक्तेः प्राणान्ददाति भक्तरक्षणार्थं पुनः प्राणदः भक्तरक्षणत
त्पर इत्यर्थः वासव इंद्रस्तस्यानुजो वासवानुजो वामनावतारे सरसामस्मि सागर इति भगवद्वचनादपांनि
धये इति चतुर्थ्यंतम् अज्ञानस्य सतः प्रपंचोपादानत्वादधिष्ठानम् अप्रमत्तः तत्तत्कालिकतत्तत्कर्मसु अप्रमत्तः
स्वे महिम्नि स्थितः प्रतिष्ठितः प्रतिष्ठा संजाताऽस्येति वा ४८

म.भा.
२९
द.ध.टी.

स्कंदतिवायुरूपेणशोषयतिस्कंदः स्कंदस्यवायोर्धरःस्कंदधरः धुरंजगदुत्पत्यादिरूपांवहतिधुर्यः वकाराद
भिमतान्पदार्थान्ददातिवरदः वायुवद्वेगवद्वाहनंगरुडरूपमस्यवायुवाहनः वसुदेवापत्यत्वाद्वासुदेवः बृहंतो
भानवोऽस्यचंद्रसूर्यरूपस्यबृहद्भानुः आदिकारणंसतुदेवःक्रीडादिमानआदिदेवः पुराणिशत्रुणांदारयति
पुरंदरः वाचयमपुरंदरौचेतिसाधुः ४९ नशोकोस्मादशोकः तारयतिभक्तांस्तारणः तारयतिदुष्टनावितिशिष्टपा
लादीस्तारः पराक्रमवत्वान्शूरःशूरस्यापत्यंशौरिः अवहितमप्यपत्यंभवतीतिसिद्धांतात जनानामीश्वरोजने
श्वरः अनुकूलएवसर्वेषामात्मरूपत्वातऽनुकूलःशतमावर्ताप्रादुर्भावा अस्यशतावर्तःपद्मंहस्तेस्यास्तिपद्मी

स्कंदःस्कंदधरोधुर्योवरदोवायुवाहनः वासुदेवोबृहद्भानुरादिदेवःपुरंदरः ४९ अशोकस्तार
णस्तारःशूरःशौरिर्जनेश्वरः अनुकूलःशतावर्तःपद्मीपद्मनिभेक्षणः ५० पद्मना
भोरविंदाक्षःपद्मगर्भःशरीरभृत महर्धिरृद्धोवृद्धात्मामहाक्षोगरुडध्वजः ५१

श्रिति अपरेणाधुनामत्वंश्रीभागवते पद्मनिभेईक्षणेअस्यपद्मनिभेक्षणः ५० पद्मस्यनाभिः कार्णिकातस्यत्वातपद्म
नाभः पुनअरविंदेइवाक्षिणी अस्यारविंदाक्षः पद्मेहृदयपद्मेगर्भइवतन्मध्येउपास्यत्वात्पद्मगर्भःशरीराणि
बिभर्ति अन्नरूपेण पोषयति प्राणरूपेणधारयति वाशरीरभृत् महताहृद्धिरस्यमहर्द्धिः प्रपंचरूपेण व
द्धत्वात ऋद्धः वृद्धःपुरातनः आत्मास्यावृद्धात्मामहांत्यक्षाणिइंद्रियाण्यस्यमहाक्षः अक्षोविभीतकतरुःपाक
शाकोसौनामिंद्रियंइतिकोश्यान गरुडध्वजेःचक्रपाणिवत्परनिपातःगरुडोध्वजोस्येतिवा ५१ श्रिव
२९

नतुलाउपमास्यअतुलः नत्वत्समोस्त्यभ्यधिकः कुतोन्यइतिभगवद्गीतास्वोक्तेः शीर्यंतेशरीराणितेषुप्रत्यगात्मतयाभा
तिशरभः विभेत्यस्मात्सर्वः भीमः भीमादयोपाप्यानइतिसाधुः समयज्ञः तत्तत्समयंजानातिसमयज्ञः समसमत्वंयज्ञोस्या
वासमत्वमाराधनमच्युतस्येतिप्रल्हादोक्तेः हविर्हरतिग्रस्ततिहविर्हरिः अहंहिसर्वयज्ञानांभोक्तेतिभगवद्वच
नात अथवाहवीरूपत्वाद्धविः तच्चासौहरिः सर्वपापहरत्वाद्धरिः सर्वैर्लक्षणैः प्रमाणैर्जायमानंलक्षणंज्ञा
नंतत्रसाधुः सर्वलक्षणलक्षणः सर्वशास्त्रतात्पर्यविषयत्वात् लक्ष्म्यानित्यः मस्यास्तिलक्ष्मीवान्नित्ययोगेम

अतुलःशरभोभीमः समयज्ञोहविर्हरिः सर्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः ५२
विक्षरोरोहितोमार्गोहेतुर्दामोदरःसहः महीधरोमहाभागोवेगवानमिताशनः ५३

तुपसमितिंसंग्रामंजयतिसमितिंजयः ५२ विगतःक्षरोयस्मान्नाशःविक्षरः रोहितोमत्स्यवपुर्धरत्वात् मार्ग्यते
अन्विष्यतेमार्गः हेतुः निमित्तोपादानोरूपः दमेनप्राप्यादामउदाराउत्कृष्टामतिर्यद्वि[illegible]षपादामोदरः पृष्टोद
रातिः दमात्दामोदरंविदुरितिमहाभारते तयोर्मध्यमपगतंवद्धदाम्नागाढंतयोदरे ततश्चदामोदरंतांसययौ
दामवंधनादितिब्रह्मपुराणेसर्वान्सहते अभिभवतिसहः माहीगिरिरूपेणधरतिपुनर्महीधरः माहात्म्यभागोभा
ग्यमस्यमहाभागः वेगवान्अनेजदेकंमनसोजवीयइतिश्रुतेः अमितमशनंमस्यसर्वसंहर्तृत्वात् अमिताशनः ५३

उद्भवो भवान्संसारात् उद्भवः क्षोभयति क्षोभणः प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः क्षोभयामास भगवान्सर्गकाले स्वयं व्ययेति विष्णुपुराणे दीव्यति क्रीडादि करोतीति देवः श्रीर्विभूतिर्जगद्रूपा उदरेऽस्य श्रीगर्भः परमश्चासावीश्वरश्चेति परमेश्वरः साधकतमं करणं प्रनन्यथासिद्धनियत पूर्वकवर्त्तिकारणं धातूपात्तव्यापाराश्रयः कर्त्ता विकरोतीति विकर्ता दुर्विज्ञेयत्वात् गहनः गृहति संवृणोति स्वरूपं गुहः ५४ संविद्रूपत्वात् व्यवसायः व्यवतिष्ठते जगदस्मिन्निति व्यवस्थानः संतिष्ठते समाप्तिं भजत्यस्मिन्संस्थानः स्थानं वैकुंठादि भक्तेभ्यो ददाति स्थानदः नानाकर्म कर्तृत्वेपि स्वरूपतो ध्रुवः परा ऋद्धिः रस्य परर्द्धिः स्वप्रकाशज्ञानरूपतया परमः स्पष्टः परमानंदरूपत्वात् तुष्टः

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः करणं कारणं कर्ता विकर्ता गहनो गुहः ५४ व्यवसायो
व्यवस्थानः संस्थानः स्थानदो ध्रुवः परर्द्धिः परमस्पष्टः तुष्टः पुष्टः शुभेक्षणः ५५ रामो
विरामो विरजो मार्गो नेयो नयोऽनयः वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ५६

पूर्णत्वात् शुभं सर्वेषां सर्वार्थदमीक्षणं यस्य वेत्ति कं पद्विषयं वा शुभेक्षणः ५५ रमंते योगिनोऽस्मिन्निति रामः रमंते योगिनोऽनंते सत्यानन्दे चिदात्मनि इति रामपदेनासौ परं ब्रह्माभिधीयत इति पुराणे विरमते जगदस्मिन्निति विरामः विगतं रजो यस्मा
य
द्विरजः ब्रह्मविशेष्यं मार्ग पर्यवसानमाचष्टे पुनः मार्गः भक्तैः स्व स्व हृदयेनेतुं शक्यो नेयः न पतिभक्तोपहृतं अल्पमपि नयः पत्रं पुष्पं फलं तोयमिति भगवद्वचनात् नन पातिवहुप्यभक्तोपहृतमनयः सर्पेभ्यभक्तोपहृतं न मेत्तो षायकल्प तद्इति वचनात् ४०० शान्तो विक्रान्तो वीरः श्रद्दधानस्य सत्पदयासु शक्तिमतां मध्ये श्रेष्ठः शक्तिमतां श्रेष्ठः धर्ममाचष्टे करोतिवा

विगताकुंठाप्रतिघातोयेभ्यस्तेषांभक्तानामयंवैकुंठः पूरणात्स — —ध्येवततोसौपुरुषोमतइत्युद्योगपर्वणिप्रकृष्टः प्रा
णःशब्दोवेदरूपोस्यप्राणः प्राणंवेदंददातिब्रह्मणेपुनःप्राणदः योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्
मादितिश्रुतेः प्रकर्षेणनूयतेस्तूयतेप्रणवः वाच्यवाचयोरभेदात्प्रणवएववाप्रणमंतोह्यस्यदेवास्तस्मात्प्रणवउ
च्यतइतिसनत्कुमारवचनानुसारेणतुपृषोदरादिःपृथुर्व्यापकःपृथुराजरूपोवाहिरण्यशब्देनस्वर्णवाचिनाप्र
शस्तोलक्ष्यतेसचासौगर्भोअर्भकःपुनःहिरण्यगर्भःगर्भोभ्रूणेअर्भकेकुक्षौचेतिविश्वःशत्रून्हंतीतिशत्रुघ्नः व्याप्नोति
व्याप्तःकर्तरिक्तः वातिसर्वंचवायुरधःप्रकाशनाःसमर्थश्चस्त्रजंद्वंद्वेंद्रियज्ञानमस्मिन्नधोक्षजः ५७ ऋतुर्वसंतः

वैकुंठःपुरुषःप्राणःप्राणदःप्रणवःपृथुः । हिरण्यगर्भःशत्रुघ्नोव्याप्तोवायुरधोक्षजः ५७
ऋतुःसुदर्शनःकालःपरमेष्ठीपरिग्रहः । उग्रःसंवत्सरोदक्षोविश्रामोविश्वदक्षिणः ५८

ऋतूनांकुसुमाकरइत्युक्तेःशोभनंदर्शनमस्यसुदर्शः कालपतिः कालःकालकलयतामहमितिभगवद्वचनं पर
मेसर्वोत्कृष्टेस्थानेतिष्ठतिपरमेष्ठीतत्पुरुषेकृतेसत्यलुक्ग्रंवावेतिषत्वंपरिगृह्यतेस्वीक्रियतेमुमुक्षुभिरन्यदेवतात्यागे
नपरिग्रहः उतउत्कृष्टंयथातथाग्रसतेसर्वंउग्रःसदाशिवरूपःसदाशिवनामावाशिवविष्णोरभेदवचनानिच
पान्नामानितवगोविंदेत्युक्तवचनबलाच्च सम्यग्वसंतितत्कर्मसूतेननतत्कालरूपेणसंवत्सरः देशकालस्त
थाद्रव्यमित्याद्युक्तत्वात्क्रतुर्धर्मश्चमन्मयइत्युक्तेः दक्षश्चनलसःसत्कर्मसुविश्राममपतिजगद्विश्रामः
।विश्वस्मिन्दक्षिणःविश्वदक्षिणः दक्षिणःसरलोदारपरछंदानुवर्तिनिपुणेतिविश्वः ५८ ५८ ५८ ॥

भा॰
ध॰टी॰
२१

विस्तार्यते जगदस्मिन्विस्तारः सर्वत्र स्थितिशीलः स्थावरं आकाशादि पदार्थाः तत्रापि स्थाणुः स्थिरः सद्रूपेण स्थाणुरविसर्गसंधिः अतएव स्थावरः स्थाणुर्वेद इति चतुर्थ्यन्तेऽप्रस्तिभातीत्यभिपुक्तोक्तेः प्रमाणं प्रमाता सत्यवादो वा प्रमाणं नित्यमर्यादा सत्यवादि प्रमाता स्थितिविश्वः वीजमव्ययं इत्येकं नाम वीजापाव्ययापेति चतुर्थ्यन्तः अर्थ्यतइत्यर्थः नास्त्यर्थः परमार्थोऽस्मादऽनर्थः प्रपंचस्या वस्तुत्वेनास्येव परमार्थत्वात महान्कोशोऽस्य महाकोशः महान्कोशश्चानंदमय इति वा महान्तः कोशाः अस्मिन्वा सगुणब्रह्मणः सर्वाधिष्ठानत्वाभ्युपगमात महाभोगः सुखं वा यस्य सः महाभोगः भोगसुखे स्त्र्यादि रतामित्युक्तेः महान्तो धना अस्य महाधनः निः किंचनजनप्रिय इति तत्र तत्रोक्तेः ५९ न निर्विंधिते भक्तकार्येष्वनिर्विण्णः स्थविष्ठः भूः सन्नाद्रूपः न भवति अभूरिति वा धर्मस्य यूप इव धर्म

विस्तारः स्थावरः स्थाणुः प्रमाणं वीजमव्ययं अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ५९
अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ६०

यूपः यूपे यथा पशुर्बध्यते यथा भगवति धर्म इत्यर्थः भगवदधीनो धर्म इति यावत अक्षातिस्म क्षामे वा स्वोक्तेः भगवतः सर्वातर्यामित्वात्सर्वे महान्सर्वमखापेक्षया धिकफलदो मखो यस्य महामखः नक्षत्राणि नेमयो यस्य नक्षत्रनेमिः श्रीतांशावितिविश्वः सएवाह्लादकः प्रशस्तं नक्षत्रं जन्मकाले यस्यास्ति नक्षत्री धर्मप्रधानो निपुणः सुशीलः प्रियंवदः शास्त्ररतः सुखाय स्याद्द्रोहिणीषु प्रवरः कुलस्य पुमान्विवेकी रनलालसश्चेति ज्योतिषेक्तमते स्वल्येनाचनेनाऽपराधाऽक्षमः अपराधसहस्राणि अपराधसानानिच यमेनैकेन देवेशः क्षमते प्रणिपातिते इति स्कांदेक्षामः कृशोऽभक्तदुःखोपस्थितो भक्तेष्वस्मतः अतिअर्यणत्वात गणमेतस्य दृष्ट्वा मेहृदयान्न व्यपसर्पति यज्ञोविंदे

शि॰
२१

पक्षोयस्सरूपः पक्षौवैविष्णुरितिश्रुतेः क्रतुर्धर्मश्चजन्मयस्यइतिश्रीभगवताश्च इज्यतेइज्यः पक्षइत्येकंनामेतिभक्ताः पक्षेराज
सूय इज्यइतितदर्थः महतीइज्यास्यमहेज्यः करोतिनानाक्रियाः क्रतुः सततंतायतेसत्रंसत्रंयागरूपोवासतांसज्जनानांगतिप्राप्यः
सतांगतिः सर्वंपश्यतितच्छीलः सर्वदर्शी विशेषेणमुक्तोदोषेरात्माविमुक्तात्मा सर्वंजानातिविशेषेणसर्वज्ञः ज्ञानमुत्तमं
इत्येकंनामेतिभाष्येइतिभिन्नंज्ञानरूपइतितदर्थः ६१ शोभनंव्रतमस्यसुव्रतः सकृदेवप्रपन्नायतवास्मीतिच याचने
अभयंसर्वभूतेभ्योददाम्येतद्व्रतंममेतिश्रीमदध्यात्मरामायणेप्रोक्तं शोभनंमखमस्यसमुखः सूक्ष्मः दुर्वि
ज्ञेयः शोभनोघोषोस्यसुघोषः सुखंददातिभक्तेभ्यः सुखदः सुहृत्प्रत्युपकारमनपेक्ष्योपकर्ता मनोहरनामपित्वात्मना

पक्षइज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः सर्वदर्शीविमुक्तात्मासर्वज्ञोज्ञानमुत्तमं ६१ सुव्रतःसुमुखः
सूक्ष्मःसुघोषःसुखदःसुहृत् मनोहरोजितक्रोधोवीरबाहुर्विदारणः ६२ स्वापनःस्ववशो
व्यापीनैकात्मानेककर्मकृत् वत्सरोवत्सलोवत्सीरत्नगर्भोधनेश्वरः ६३

नोहरतिमनोहरः जितःक्रोधोऽनेनजितक्रोधः वीरास्तत्तत्कर्मसमर्थावाहवोस्यवीरबाहुः विदारयतिरिपुवक्षोनृसि
हावतारेविदारणः ६२ स्वमापयतिप्रापयतिभक्तान्स्वापनः सुष्टुऽनस्यःऽपराधीनः स्वेषांवशइतिवा व्याप्नो
तिव्यापीनैकेषामात्मानेसामात्मानैकात्मासकलजीवविंबरूपत्वात्नैकानिकर्माणिकरोतिनेककर्मकृत् वत्स
रान्वोतिददातियोगोपीभ्यः वत्सरः वत्साहरणलीलापांतयादर्शनात् वत्सलः स्नेहोभक्तेष्वस्यवत्सलः व
त्साःसंतिचारणायअस्यवत्सी रत्नानिउत्कृष्टानिवस्तूनिगर्भेऽस्यरत्नगर्भः धनस्येश्वरोधनेश्वरः अन्मादे

४३

श्री.
वि.टी.
२२ धर्मं गोपायतिधर्मगुप् धर्मगुपे चतुर्थ्यं तं धर्मं करोतिधर्मकृत् प्रशस्तो धर्मोऽस्तस्य धर्मी सत्स्थूलमसत्सूक्ष्मं क्षरं विनाशी अक्षरमविनाशिनं विज्ञाता रूपः किंतु ज्ञानरूपः अविज्ञाता अविनाम विरूपपन्नानां गोपानां ज्ञानेतिवा तस्य तत्कर्म विज्ञायेतिदशमोक्तं सहस्राणि अंसनः किरणा अस्य सूर्यरूपस्य सहस्रांशु विशेषेण धत्ते धारयति पोषयति वा जगद्विधाता कृतानि पर्याप्तानि लक्षणान्यस्य कृतलक्षणः पुण्यपर्याप्तयोगः कृतः गुणैः प्रतीतेतु कृतलक्षणः कृतलक्षणाविति चामरः ६४ गभस्त्योरश्मयो नेमयद्वास्य गभस्तिनेमिः ध्यायेत्सदा सवितृमंडलमध्यवर्ती इत्युक्तेः सचेति सत्वस्थः उधमस्या सदालक्ष्मीरितिवत् सत्वगुणेन प्राप्य इत्यर्थः नृशब्दलोपेन सत्यभामेतिव

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरः अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ६४
गभस्तिनेमिः सत्वस्थो सिंहो भूतमहेश्वरः आदिदेवो महादेवो देवेशो देवभृद्गुरुः ६५ ॥
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ६६ ६६

न्नृसिंह शब्देनोच्यत इति भाष्ये सिंह इव विक्रमो वा भूतानां सहस्यो त्सवस्येश्वरः भूतमहेश्वरः आदिः कारणभूतो देवः सकलदिव्यबुद्ध्यात्वर्षाश्रयः आदिदेवः अतएव महान्देवः महादेवः देवानामीशः ईशानशीलः देवेशः देवान्बिभर्तिदेवभृत् गुरुः गृणातितत्वं गुरुः देवभृतां गुरुः देवभृद्गुरुः सुराणां देवताश्चक्रस्यापि जनार्दनइतिदानधर्मे ६५ उत्तरः सर्वोत्कृष्टः गवांपतिः स्वामी गोपतिः गोपायतिगोप्ता ज्ञानेन गम्यो न कर्मणा ज्ञानगम्यः न कर्मणेतिश्रुतेः पुरापि भवत्वात्पुरातनः शरीरभूतरूपाणि भूतानि बिभर्ति शरीरभूतभृत् यस्य पृथिवी शरीरमित्यादिश्रुतेः भोक्तापालयिता पंचमंशातं ५०० एकोपिं सुग्रीव इंद्रोऽनेन कपीन्द्रः भूरिभ्यो दक्षिणः भू

श्री
२२

सोमं पिबतीति सोमपः रघुनाथपार्थादिरूपेण नानायज्ञानां कर्तृत्वात् अमृतान् देवान् पातीत्यमृतपः सोमः चंद्र इवाल्हादकत्वात्
मानसी हैमवती हरिद्रा कीर्तिकांतिष्विति विश्वोक्तेः कीर्तियुक्त इति वा पुरून् बहून् जनयति पुरुजित् पुरवो बहवः सत्तमा यस्मि-
न् पुरुसत्तमः वीतरागभयक्रोधा मन्मया मामुपाश्रिता बहवो ज्ञानतपसा पूता मद्भावमागता इति भगवद्वचनं विशि-
ष्टो नयो ऽस्य विनयः यो वैन कामान्न भयान्न क्रोधान्नार्थकारणात् अन्यायमनुवर्तेत स्थिरबुद्धिरलोलुप इत्युद्योगपर्वणि
जयति क्रोधादीन् जयः सत्या संधा प्रतिज्ञास्य सत्यसंधः नानृतं हि वचो विप्र प्रोक्तपूर्वं मया न घम कृतप्रतिज्ञो हि पतिर्लो-
कानां सत्यवान् भवेदिति हरिवंशे विप्रेति नारदसंबोधानं दाशो दानं स्मृदानइति धातोः तत्राईति योग्यः दाशार्हः अतः पात्र-
तरः को ऽन्यस्त्रिषु लोकेषु विद्यते कृष्णात्कमलपत्राक्षाद्देवदेवाज्जनार्दनः इति हरिवंशे दाशार्हवंशोद्भवत्वाद्वा दाशार्हः

सोमपो ऽमृतपः सोमः पुरुजित्पुरुसत्तमः । विनयो जयः सत्यसंधो दाशार्हः सात्वतांपतिः ९७
जीवो विनयिता साक्षी मुकुंदो ऽमितविक्रमः अंभोनिधिरनंतात्मा महोदधिशयो ऽन्तकः ९८

सात्वतं पौष्कलं चैव तंत्रं द्वैयांच रात्रिके इति ब्रह्मांडपुराणे तत्संदाचरंतीति सात्वतो नारदाद्याः लिजंतात्क्विप् तेषां पतिर्योगक्षे-
मनिर्वाहकः सात्वता यादव विशेषा लाणं पति र्वा पतिर्गतिश्च ध क वृष्णि सात्वतामिति प्रथमस्कंधे श्रीमुकोक्तेः सातिः
सुखार्थः सो ज्ञो हेतुमण्यंतः तस्मात्क्विः सात्या वा सत्वसन्ना येनां कृपसात् परमात्मा सात्वतां भक्ता इति त्वनुपसर्गाल्लिंपविदि
स्थ्रेमभिपुक्ताः तत्सोमुत्वर्थे इति मत्वा जुररणत्वेन ९७ जीवयति जीवः विनयति विनायिता तस्याः साक्षी विनयिता साक्षीत्ये-
कं नाम मुक्तिं भक्तान्ददातीति मुकुंदः पृषोदरादिः अमिता विक्रमा अस्येत्यमितविक्रमः तानि हु वा णानि चत्वार्यंभांसि
देवा मनुष्याः पितरो ऽसुरा इति श्रुतेरंभसां देवादीनां निधिरिवोपादेयः अंभोनिधिरनंतेत्र श्रीमति वलभद्रे आत्मा चि-
त्तमस्यानंतात्मा महोदधौ शेते महोदधिशयः अंतकः ९८

प॰टी॰
३

नजायते प्रादुर्भवति प्रसुद्धहृदये अजः महः पूजातदर्हो मदार्ह इति भाष्ये महान् हो वा स्वैर्भक्तैर्भाव्यः चिंतनीयः स एव स्वा
भाव्यः जिताअमित्रा अनेनेति जितामित्रः प्रकर्षेण मोदते मोदयति वा प्रमोदनः आनंदः सुखं एतस्यैवान्यानि भूतानि
मात्रामुपजीवंतीति श्रुतेः नंदयति सधर्मयति जनानंदनः स्व पंचसमृद्ध्येति अतो नंदः सत्यो धर्मो स्य सत्य धर्मा पापा
दिरहितः त्रिषु लोकेषु विक्रमो गमनमस्य त्रिविक्रमः ६८ महर्षिः कपिलाचार्य इत्येकं नामेति भाष्य कृतः महान्न
पि रतीद्रियदर्शी महर्षीः कपिलश्चासावाचार्यश्च कपिलाचार्यः सिद्धानां कपिलो मुनिरिति गीतासु आचिनोतिशा

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः ६९
महर्षिकपिलाचार्यो कृतज्ञो मेदिनीपतिः त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतांत कृत १०

स्त्रार्थमाचरेस्थापयत्यपि स्वयमाचरते यस्तु स आचार्य उदाहृत इति स्मृतिः कृतं जानाति कृतज्ञः मेदिन्याः प
तिर्मेदिनीपतिर्युधिष्ठिरोग्रसेनयोरपि भगवदधीनत्वाद्रामावतारे पृथिवीपतित्वाद्वा त्रीणि पदान्यस्य त्रिपदः त्रि
दशानां देवानामध्यक्षः त्रिदशाध्यक्षः महाशृंगं प्रभुत्वं उत्कर्ष विषाणं वा मत्स्यावतारे स्य महाशृंगः श्रृंगं प्रम
ले शरीखवे रचिकृतो अंबुपक्षके विषाणोत्कर्ष योः अपीति विश्वः कृतांतः सिद्धांत करोतीति कृतांत कृत यमम
कुशं नकर्म वा कृंततीति तिनयापा कृतांतोपमसिद्धांत देवा कुशलकर्मा इति यमरः १० १० १० १० १० १०

श्रीव॰
२३

ॐ महांश्चासौ कोहरो वराहः गाः विंदति लभते च रपितुं मो विंदः अष्वतत्वोदहं नंतानुगोविंदो वेदनाहुयमितुयोगपर्वणिसेन
यामुष्टुपाति सुषेणपति शिशृंगंतात पवाघचतुउपसर्गान्सुनोतिषत्वमार्षः शोभनासेनास्यवाकनकांगदं स्वर्णमयं चंपकम
यं वाके यूरं तदस्यास्तीति कनकांगदी कनकचंपकस्वर्णइति विश्वः गूहितं संवरीतुं योग्यः गुह्यः परमरहस्यरूपत्वात् तंप्रांमित
हि गुहिम्पः स्त्वएव मंत्रम्य इति क्यपूगूढामिप्रापत्वाद्गंभीरः नयस्यकार्हेचिदितिप्रथमस्कंधोक्तेः गहनो दुःप्रवेशः भक्तैर
वस्याव्ययभावसात्वित्वाद्गहनोऽहं दृष्टेयश्चाघत्वात् गुप्तः मायाछेषामपास्यछायमां पश्यसि नारदेत्युक्तेः चक्रगदेसु
दर्शनकौमोदकौ तपोर्धरः चक्रगदाधरः ७१ । विधत्ते भक्तानां हितं वेधा इति भाष्य कृत इदं चार्थिकेन त्वेन ग्रातो रूपं परषा
दादित्वकल्पनापत्तेः रूपतु विधविधाने इत्यस्मादसुति वेधः स्वेन भक्ताः अंगानी वास्य स्वांगः शत्रुभिर्न जितः अजितो भ

महावराहो गोविंदः सुषेणः कनकांगदी गुह्यो गंभीरो गहनो गुप्तश्चक्रगदाधरः ७१ वेधाः स्वांगो
जितः कृष्णो दृढः संकर्षणोऽच्युतः वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ७२

क्तैर्जितो वा कृष्णवर्णश्चायमे यस्मात्तस्मात्कृष्णो हमर्जुनेति मोक्षधर्मोक्तेः पुनः कृष्णः समर्थत्वात् दृढः दृढः स्थलेम
प्रोशक्तेप्रगाढेपि दृढोमत इति अजितो भक्तैरितितावाविश्वः संकर्षतिभक्तद्दुःखं संकर्षणः मच्युतं त्यपि पद्रूतोमहत्पांप्रल
यापदिप्सतोच्युतः स्मृतो लोके सर्वगो व्यापक इति काशीखंडे संकर्षणोच्युतः इत्येकं नाम्नेतिभाष्ये वृणुते स्वं प्रापयितुं वरु
णः नापमात्मयव वनेन लभ्योनचेज्यया न हुनाश्रुतेन यमेवैष वृणुते तेन लभ्यः तस्यैषमात्मा वृणुते तनुं स्वामिति श्रुतेः
वरुणपदेन वरुण लोको लक्ष्यते तत्र आगतः वारुणः एवं प्रसादितः कृष्णो भगवानीश्वरः स्वयं आह पार्थाय स्वपितरं वै धुनो
चावहमुदमिति वरुणलोकं गत्वानंदमाद्यापतत आगमनस्य इत्थामेडलः वृक्ष इति संसारं वृक्षः भक्तकल्पवृक्षो वा व्यो
मपुष्करमंबरमितिष्लोकेपुष्करं जलं दाति ददाति पुष्करमिति नीरस्तोम्बुके पुष्कराक्षस्य जलवाचित्वा वृक्षमेघकृतेपि पुष्क
रं पुष्करं जलं तत्र प्राति उल्लसि ज्ञते इति व्युत्पत्या मजले अस्याक्षित्रेणः इति पावतत्वाहस्य क्षाविती अस्य पुनः पुष्कराक्षः गोप्यादृदेत्व

वि.स.टी.

२४

ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसः श्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणा भगोनित्योऽस्त्यस्यभगवान्उत्पत्तिंप्रलयंचैवभूता
नामागतिंगतिं वेत्तिविद्यामविद्यांचसवाच्योभगवानितिपुराणे ऐश्वर्यंसंहारकालेहंतीतिभगहास्वरूपसुखंनित्यमस्यास्ति
आनंदीभक्तोऽस्तुभगवद्देवविशेषणंनेत्रहरणेनहंतीतिक्लेशापतिमहादेवस्तमानंदयतीभगहानंदीयथाहुः कदंबकुसुमोद्भा
सिवनमालाविराजितहृत्स्थले: वनमालीव्रीह्यादीत्वादिति आपादतंविनामालावनमालेतिकीर्तिते हलानिपातुवि
लेखनकर्तरि आयुधमस्यहलायुधः हलविलेखनइतिधातुपाठात अदितेरपत्यमादित्यः ज्योतिषामादित्यव
ज्योतिरादित्यःप्रतापेनचतीव्रत्वेनदीप्त्यापूर्णतयापिच उत्तमस्त्वाहंमर्त्येषुदेवेष्विवदिवाकरइतिहरिवंशे आदि
त्याद्यपितज्योतिरादित्योज्योतिः कोटिसूर्याधिकज्योतिः कोटिचंद्राधिकद्युतिः कोटिकंदर्पलावण्यप्राण्यप्रा

भगवान्भगहानंदीवनमालीहलायुधः आदित्योज्योतिरादित्यःसहिष्णुर्गतिसत्तमः १३
सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः दिवस्पृक्सर्वदृग्व्यासोवाचस्पतिरयोनिजः १४

णकोट्याधिकप्रियः इतिपुराणादितितुभक्ताः शिशुपालस्यापराधान्सहतेसहिष्णुःपुनश्चपराधशतंस्वाम्यमपाघस्स
पितृष्वसः पुत्रस्यतेवधार्हस्यमाधवेशोकेभनः कृष्णाइतिसभापर्वणि गतिशब्दश्चपर्णीयेषुसत्तमःगतिसत्तमः १३
शोभनंधनुःशार्ङ्गमस्यसुधन्वाखंडपरशुरस्यजामदग्न्याकृतेः खंडपरशुरखंडपरशुरितिवाआसमंतात्खंडपर
शुर्महादेवोऽस्यऐश्वर्यमाधुर्यवशत्वादितितुभक्ताः मत्स्वानामप्राणिदूत्याघुक्तैर्भक्तानांसोम्योपिविरोधिनांदारुणःद्र
विणंप्रददातीतिभक्तेभ्योद्रविणप्रदः द्रविणंकांचनेवित्तद्रविणंबपराक्रमइतिविश्वः दिवंस्पृशतीतिदिवस्पृक्वामनावता
रेतथादर्शनात सर्वदर्शीवेदव्यासरूपत्वात्सर्वदृग्व्यासः कृष्णद्वैपायनंव्यासंविद्धिनारायणंप्रभुं कोह्यन्यःपुंडरी
काक्षान्महाभारतकृद्भवेदितिपुक्तेः वाजस्पतिरयोनिजइत्येकंनामेतिभाष्ये वाचोविद्यायाःपतिर्जननंयानजायतइ

श्री व

२४

वेदव्रतसंख्यातानित्रीणिसामानिप्रतिपादकान्यस्यत्रिसामागायतिब्रह्मवितस्त्वेणसामगः एतत्सामगायन्नास्तइत्याद्श्रुतेः वेदानांसामवेदोस्मीतिवचनात्साम परमानंदरूपत्वान्निर्वाणंअमृतानंदगोविंदस्पापुत्रे भैषजंसंसाररोगैकविद्योपदेशित्वाद्भिषक् भिषक्तंभत्वाभिषजांश्रृणोमिसुत्रेः संन्याससंभोस्त्वार्थंकरोतिसंन्यासकृतत्समपाचष्टेसंन्यासिभ्यः पतीनांप्रशमोधर्मोनियमोवनवासिनां दानमेवगृहस्थानांशुश्रुषाब्रह्मचारिणामितिस्मृतिः केवलरूपेणशमः सुविषयसत्वाच्छांतः प्रलये नितरांतिष्टंतिभूतान्यत्रनिष्टाशांतिरविद्यानिवृत्तिः तस्याब्रह्मरूपत्वव्यवस्थापनानपरंपुनरावृत्तिरहितमयसंस्थानंपरायणंपुल्लिंगपाठेवहुव्रीहिः ७५ शुभान्यंगान्यस्यशुभांगः शांति

त्रिसामासामगःसामनिर्वाणंभेषजंभिषक् संन्यासकृच्छमःशांतोनिष्टाशांतिःपरायणं ७५
शुभांगःशांतिदःस्रष्टाकुमुदःकुवलेशयः गोहितोगोपतिर्गोप्तावृषभाक्षोवृषप्रियः ७६
अनिवर्तीनिवृत्तात्मासंक्षेप्ताक्षेमकृच्छिवः श्रीवत्सवक्षाःश्रीवासःश्रीपतिःश्रीमतांवरः ७७

रागद्वेषवृत्तिंददातिशांतिदःसृजतिःसकलंस्रष्टाकौमोदतेकुमुदः कौपृथिव्यांवल्लतिचलतेकुवलंजलंतत्रशेतेकुवलेशयः शापवासवासिष्विलुकगोभ्योहितोगोहितोगोस्पादःपतिःगोपायतिभक्तानगोप्तावृषभोधर्मःसएवाक्षिअस्यवृषभाक्षः धर्मानुसारेणैवविषमस्रष्टत्वात वृषोधर्मः प्रियोस्यवृषप्रियः ७६ नानिवर्ततेकर्मणोलोकसंग्रहार्थाअनिवर्तविनिर्तिएवचकर्मणोस्तु कनिवृत्तोविषयेभ्यःआत्माचेतनमस्यनिवृत्तात्मासंक्षिपतिवेदार्थंगीतायांक्षेप्तासर्पःध्व‌इमयागानेसुकेक्षेमंकरोतिक्षेमकृतस्मृतिमात्रेणपावनत्वात्पुनःशिवःषष्टःशत ६ श्रीवत्सस्वदाख्यंचिह्नवक्षस्यास्यश्रीवत्सवक्षाःश्रीर्वसत्यास्मिनश्रीवासःश्रियःपतिःश्रीपतिःश्रीमतांविरंच्यादीनामपिवरःश्रीमतांवरः ७७

मा॰ना॰
टी॰ध
२५

नुचः सामानि यजूंषि सा हि श्रीरमतासतामिति श्रुतेः तां श्रियं ददातीति श्रीदः तस्या ईशः श्रीशः श्रियः शोभायां नि
वासः श्रीनिवासः पुनः श्रियो निधीयंते स्मिन् श्रीनिधिः श्रियः कर्मानुरूपेण विभावयति ददातीति श्रीविभावनः श्रि
यो लक्ष्म्या धरः श्रीधरः स्मरतामपि श्रियः करः श्रीकरः अतिशयेन प्रशस्यते इति रूपाधि परमप्रेमगोचरत्वात् सुखं
तत्त्वं परमात्मैवेति सिद्धांतात् श्रेयः उपकरणवैधुरवनाविधासु चत्वारि निष्पिताः श्रीरस्यास्ति पुनः श्रीमान् लोक
त्रयाश्रयः स्याश्रयो लोकत्रयस्याश्रयः ७८ शोभनानि अक्षाणि इंद्रियाण्यस्य स्वक्षः एवं स्वंगः शतमपरिमिता आ
नंदा अस्य शतानंदः नंदयतीति नंदिः सर्वधातुभ्य इः ज्योतिर्गणानामीश्वरः ज्योतिर्गणेश्वरः विजितात्मानेन
विजितात्मा न केनापि विधेयः कार्य आत्मा विग्रहोऽस्येति विधेयात्मा विधेयो विनयग्राहो त्यमरः विधेय आत्मा

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः श्रीधरः श्रीकरः श्रेयः श्रीमांल्लोक
त्रयाश्रयः ७८ स्वक्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः विजितात्मा विधेयात्मा सत्कीर्तिः
छिन्नसंशयः ७९ उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः भूशयो भूषणो भूतिर्विशो
कः शोकनाशनः ८०

चित्तं देहो वास्य विधेयात्मा वा सत्कीर्तिरस्य सत्कीर्तिः छिन्नाः संशया अस्य छिन्नसंशयः ७९ उदीर्णः तोधि
कः सर्वतश्चक्षुरस्य सर्वतश्चक्षुः नास्ति ईशोस्य अनीशः न तस्य शोकः कश्चनेति श्रुतेः शाश्वतः स्थिर इत्येकं
नामेति भाष्ये सकलकालदेशव्यापीति तस्यार्थः शाश्वतः स्थिर यो नित्यं चनं धर्म्यां तं शाश्वता य स्थिरा येति वा सवि
सर्गयाः द्वावपरिशरीति वैकल्पिक विसर्गलोकाविधातत्त्व चरमवमेव प्रभु विशेते सा तान्वेषणे सागरतीरे
भूशयः क्रौ चिस्य लवतल्पेषु निपुद्धक्रमकर्षितः इदं तम् लाश्रयः शेते गोपोत्संगोपबर्हणे इति दशमोक्तेः श्री
रूपरमा वनारपोमे वेदं दंनामेतित मत्ताः भूषयतीति सर्वं भूषणः नंद्यादि भूतिः समाविगतः शोकोस्मात् वि

सर्व

श्रिय
२५

अर्ची विसंतस्य सूर्यादिदीप्त्या विद्यमानानि । अर्चिष्मान् यदादित्यगतं तेज इत्यादि भगवद्वचनात् अर्चितः पूजितः सर्वैः
कुंभवदस्मिन्सर्वं प्रतिष्ठितमिति भाष्ये कुंभान्यस्य संति कुंभीधान्यादि । क्वचित्कुंभे क्वचामलकमुष्टिभीरि
त्युक्तत्वात्कोऽनिश्चेरनुर्वन इति दशमोक्तादिति भक्ताः । विशुद्ध आत्मास्य विशुद्धात्मा विशेषेण शोधयति
पापं विशोधनः नानिरुद्धः क्वचित्पुनरनिरुद्धः मास्ति पुनिरिषः प्रतियोद्धास्य अप्रतिरथः पुनः मतिमान्ने
नेत्रीन्नवलोकानतिरिच्यते तं कस्मं पुंडरीकाक्षं कोनपश्येतबुद्धिमानित्युद्योगपर्वणि प्रकृष्टं द्युम्नं ध
नमस्य प्रद्युम्नोऽमितः । विक्रमोस्यामितविक्रमः ८२ कालनेमिनामानमसुरं निहतवान्कालनेमिनि

अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः अनिरुद्धोऽप्रतिरथः प्रद्युम्नोमितविक्रमः ८१
कालनेमिनिहा वीरः शूरः शौरिः जनेश्वरः त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरि ८२

हा कालनेमिरहं कंसः तदवतारत्वादिति भक्ताः । विमरुं ददाति पुनरीरः शौर्ययुक्तत्वात् शूरस्य वसुदेवापत्यं शौ
रिः पुनः शूरश्चासौ पिजनानामीश्वरश्च जनेश्वरः अवयवो लोकः त्रिलोकस्तस्य आत्माधिष्ठानं त्रिलोकात्मा । एवं त्रिलोक
स्येशः त्रिलोकेशः प्रशस्ताः केशाः सूर्यादिसंक्रांताः अंशवोस्य केशवः केशो केऽन्यतरस्यामिति वः अंशवो यत्प्रकाशंते
मम ते केशसंज्ञिताः सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमा इति महाभारते को ब्रह्मेति समाख्यात ईशोहं सर्व
देहिनां आवां तवांगसंभूतौ तस्मात्केशवनामवानिति हरिवंशे कोशोवातोगच्छतोस्मात सर्वधातुभ्यो वोऽहु
ल्लकादपादाने केशिनं हतवान् केशिहा हरति केरपिस्मृतः पापानि हरिः ८२ ८२ ८२ ८२ ॥

म.स.
टा. धर्मी
२९

काम्यत इति कामः स चासौ देवश्च कामदेवः कामान् भक्तानां पालयतीति कामपालः एवमपि कामो भिलाषोस्त्यस्य कामी तदहं भक्तानुपहृन्तामित्याद्युक्तेः कस्य ब्रह्मणोप्यंतो स्मात् कांतः कृतः प्रागमो वेदो येन कृतागमः अनिर्देश्यं जात्यादिरहितत्वात् इदं तदिति यच्छक्यकथनं वपुः शुद्धस्वरूपं मस्यानिर्देश्यवपुः यतो वाच इत्यादिश्रुतेः वेष्टि कान्त्या द्यावापृथिव्यौ पुनर्वि ष्णुः व्याप्येमे रोदसी पार्थ कांतिरभ्यधिका स्थिता क्रमणाद्वाप्यहं पार्थ विष्णुरित्यभिसंज्ञित इति श्रीमहाभारते पु नर्वीरोत्पत्तिः सुभटो वा वीरश्चासु भटश्चेष्ट इति विश्वे गंधर्वाप्सरसो यक्षाः किन्नरोरगचारणाः नांतं गुणानां गच्छं ति तेनानंतोयमुच्यत इति विष्णुपुराणे धनंजय निधनं जयो र्जुनः स एवायं इति तथा पांडवानां धनंजयः इत्युक्तेः ८

कामदेवः कामपालः कामी कांतः कृतागमः अनिर्देश्यवपुर्विष्णुर्वीरो नंतो धनंजयः ८३

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रि

यः ८४

३ ब्रह्मणे तपः सं मतपेहितो ब्रह्मण्यः ब्रह्माणं वेदं करोतीति ब्रह्मकृत् ब्रह्मात्मना सृष्टिसमये सृष्ट्यादये हरि विरिंचिह रेतिसंज्ञा धत्त इत्युक्तेः एवमपि ब्रह्म प्रत्यक्तमितभेदं यत्सत्तामात्रमगोचरः वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञि तमिति पुराणे ब्रह्मतपो विवर्धयतीति ब्रह्मविवर्धनः सोतप्यत इत्युक्तेः ब्रह्म वेदं तत्त्वं वा वेत्ति ब्रह्मवित् ब्र ह्मणो वेदस्य प्रवर्तको ब्राह्मणः शाखानां स्वाध्याय प्रवचने एवेति नाकोमौद्गल्य इत्यादि स्तुतिवचनेन वेदप्र वर्तकत्वावगमात् ब्रह्मतत्त्वमस्यास्तीति ब्रह्मी ब्रीह्यादित्वादिनिः ब्रह्मज्ञो जीवस्वरूपेणात्मानमेवावेदहं ब्र ह्मास्मीति श्रुतेर्ब्राह्मणः प्रियाश्चास्य ब्राह्मणाः प्रिय घ्नंतं शपंतं परुषं वदंतं यो ब्राह्मणं न प्रणमेद्यथाहं स

महांतः क्रमाः पादविक्षेपाः अस्य महाक्रमः महांति कर्माण्यस्य महाकर्मा महत्तेजोस्य महातेजाः येन सूर्यस्तपती तिश्रुतेः
महान् चासावुरगश्च महोरगः सर्पाणामस्मि वासुकिरिति गीतासु यश्चाश्वमेधः क्रतुराडित्युक्तोऽश्वमेधोपि स एवेति महान् क्रतुर्ध
र्मश्च पन्मयः इत्युक्तेः महान्यज्वा यागं कृतवान् लोकसंग्रहार्थं महायज्वा महान्यज्ञो जपयज्ञः महायज्ञः यज्ञानां जपयज्ञो
स्मीति भगवदुक्तेः महद्धविः ब्रह्मार्पणमित्याद्युक्तेः ८५ स्तव्यः स्तुतिविषयः स्तवप्रियोस्य स्तवप्रियः स्तूयते ऽनेन स्तो
त्रं गुणप्रतिपादकं शब्दस्वरूपमित्यर्थः स्तुतिर्गुणकीर्तनक्रिया स्तोता स्तुतिकर्ता त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा
कुमारी त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुख इति श्रुतेः रणः प्रियोस्य कौरव्यपांडवानां तु संधिकं

महाक्रमो महाकर्मा महातेजा महोरगः महाक्रतुर्महायज्वा महायज्ञो महाहविः ८५ स्तव्यः स्तवप्रियः
स्तोत्रं स्तुतिः स्तोता रणप्रियः पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ८६ मनोजवस्तीर्थकरो वसुरेता
वसुप्रदः

रणप्रियः दुर्योधनं सोवलं च कर्णं दुःशासनं तथा अपाययित्वा यं चाल्लिनर्षयांति विधत्ते ममेति श्रीकृष्णोक्तेः अनंतकल्या
णगुणत्वात्पूर्णः भक्तानां कामपूरणशीलत्वात्पूरयिता पुण्यः चारुः पुण्यं तु चार्वपि त्वमरः पुण्या कीर्तिरस्य पुण्यकी
र्तिरांतरा बाह्या वाऽऽमयान संत्यस्यानामयः ८६ मनः सोजवः वेगवोस्य मनोजवः अनेजदेकं मनसो जवीय इति श्रुते
: तीर्थस्य स्पर्शेन करोतीति तीर्थकरः सुहृत्संज्ञातिमनन्यदेवतदोर्भ्यां वहद्भ्यां परिरंभ्य तेन तथापांग्र प्रान्माहितीर्थो क्रिय
तेनैव देवमेवं धर्मश्च कर्मकर उच्छासित्यन इति दशमे वसुसुवर्णरेतोस्य वसुरेताः अत एव वसत्स्वगादौ तासु वीर्यमवा
सृजत तदंडमभवद्धैमं सहस्रांशुसमप्रभं इति व्यासः वसु निप्रकर्षेण यतिवसुप्रदः यस्याहमनुगृह्णामि हरिष्ये
